Web (noInc)

①+०२ उदकशान्तिः (पूर्णपाठः)

①+०२ उदकशान्तिः

# ②०१ रेखा-कर्षः

अथोदकशान्तिः

गर्भाधानादिषु पूर्वेद्युः
"उदकशान्ति-जप-कर्म करिष्य" इति सङ्कल्प्य
गोमयेन चतुर्-अश्रम् उपलिप्य

## ③प्राचीः

तत्र 'ब्रह्मजज्ञानम्' इति मध्ये,
'नाके सुपर्णम्' इति दक्षिणतः,
'आप्यायस्वे'त्य् उत्तरतः
प्राचीस् तिस्रो रेखाः

⑥०३ ब्रह्म जज्ञानम्

ब्रह्म॑ (=मन्त्रः ([सौरमण्डलयज्ञे])) जज्ञा॒नं (=उत्पन्नम्) प्र॑थ॒मं पु॒रस्ता॑द्
वि सी॑म॒तस् सु॒रुचो॑ वे॒न **आ॑वः** ।
स बु॒ध्नि॑या (=मूले भवः ([खस्य सूर्यः])) उ॒प॒मा अ॑स्य **वि॒ष्ठाः** (=विस्थितः),
स॒तश्च॒ योनि॒म् (सूर्यम्) अस॑तश्च॒ **विवः॑** (=विवृतवान्) ।

⑥०६ नाके सुपर्णमुप

नाके॑ सु॒पर्ण॒म् (→सूर्यं) उ॒प यत् पत॑न्तं
हृ॒दा **वेन॑न्तो अ॒भ्यच॑क्षत** त्वा ।
हिर॑ण्य-प॒क्षं (शतभिषक्-स्थ-)वरु॑णस्य दू॒तं
य॒मस्य॒ योनौ॑ (→भरण्यां) श॒कु॒नं भु॑र॒ण्युम्(←भृ) ॥

⑥०४ आ प्यायस्व

**आ प्या॑यस्व॒ समे॑तु** ते
वि॒श्वत॑ः सोम॒ वृष्णि॑यम् ।
**भवा॒** वाज॑स्य **सङ्ग॒थे**(=संगमने) ॥

## ③उदीचीः

'यो रुद्रो अग्नौ' इति मध्ये,
'इदं विष्णु'रिति पश्चात्,
'इन्द्रं विश्वा अवीवृधन्' इति पुरस्ताद्
उदीचीः तिस्रो रेखा विलिख्य

⑥38 यो रुद्रो

यो रु॒द्रो अ॒ग्नौ , यो अ॒प्सु ,
य ओष॑धीषु॒, यो रु॒द्रो
विश्वा॒ भुव॑ना **वि॒वेश॒**
तस्मै॑ रु॒द्राय॒ **नमो॑ अ॒स्तु** ।

⑥१७ इदं विष्णुर्वि

इ॒दवँ॒ विष्णु॒र् (अग्नि-विद्युत्-सूर्यात्मना) **वि च॑क्रमे**
(पृथिव्याम् अन्तरिक्षे दिवि च) त्रे॒धा **नि द॑धे** प॒दम् ।
(तैर् आधारैर् जगत्) **सम् ऊ॑ढम्** अस्य पाꣳसु॒रे (ले इति साम्नि, पांसुमति [पादे]) ॥

⑥०१ इन्द्रं विश्वा

इन्द्रं॒ विश्वा॑ **अवीवृधन्**
समु॒द्र(वत्)-व्य॑चसं॒ गिरः॑ ।
र॒थीत॑मं र॒थीनां॒,
वाजा॑नां॒ सत्-प॑तिं॒ पति॑म् ॥

# ②०२ कुम्भः

अद्भिर् **अवोक्ष्य**
व्रीहीन् तत्र **निक्षिप्य**

तत्र 'ब्रह्मजज्ञानम्' इति कुम्भं **निधाय**

⑥०३ ब्रह्म जज्ञानम्

ब्रह्म॑ (=मन्त्रः ([सौरमण्डलयज्ञे])) जज्ञा॒नं (=उत्पन्नम्) प्र॑थ॒मं पु॒रस्ता॑द्
वि सी॑म॒तस् सु॒रुचो॑ वे॒न **आ॑वः** ।
स बु॒ध्नि॑या (=मूले भवः ([खस्य सूर्यः])) उ॒प॒मा अ॑स्य **वि॒ष्ठाः** (=विस्थितः),
स॒तश्च॒ योनि॒म् (सूर्यम्) अस॑तश्च॒ **विवः॑** (=विवृतवान्) ।

तस्मिन् गायत्र्या तिरः-पवित्रं **निधाय**

⑥१० तत्सवितुर्वरेण्यं भर्गो

तत् स॒वि॒तुर् वरे॑ण्य(णिय)म्
भर्गो॑(=भर्जनम्) दे॒वस्य॑ धीमहि(←धा धारणे/ ध्यै ध्याने / धी आराधने) ।
धियो॒ यो नः॑ प्रचो॒दया॑त् ॥
(प॒रो-र॑जसे॒ ऽसाव॒द् ओ३म् ॥)

'आपो वा इदं सर्वम्' इत्यद्भिरापूर्य ऊर्ध्वाग्रं कूर्चं निधाय

⑥२२ आपो वा इदम्

▼ विश्वास-प्रस्तुतिः

आपो॒ वा इ॒दꣳ सर्वं॒
विश्वा॑ भू॒तान्य् आप॑ः
प्रा॒णा वा आप॑ः
प॒श॒व॒ आपो, ऽन्न॒म् आपो, ऽमृ॑त॒म् आप॑ः
स॒म्राड् आपो॑, वि॒राड् आप॑ः, स्व॒राड् आप॒श्
छन्दा॒ꣳ॒स्य् आपो॒, ज्योती॒ꣳ॒ष्य् आपो॒, यजू॒ꣳ॒ष्य् आप॑स्,
स॒त्यम् आप॒स्, सर्वा॑ दे॒वता॒ आपो॒,
भूर् भुव॒स् सुव॒र् आप॒
ॐ ॥

'भूर् भुव॒स् सुव॒र् ओम्' इति **अक्षतां** निक्षिप्य

गन्ध-पुष्पैर् **अलङ्-कृत्य**

दूर्वा-पुष्प-फलैर् **अवकीर्य**

दूर्वा-दर्भैः **प्रच्छाद्य**

'शन्नो देवी'र् इत्य् **अभिमृश्य**

⑥०४ शं नो

शं नो॑ दे॒वीर॒भिष्ट॑य॒
आपो॑ भवन्तु पी॒तये॑ ।
शं योर्(=[अ]मिश्रणाय) अ॒भि स्र॑वन्तु नः ॥ ०४॥

चतुर्-दिक्षु आसनेषु निषण्णैश् चतुर्भिर् ब्राह्मणैस् सह
कुम्भम् **अन्वारभ्य**

# ②+०३ जपः (पूर्णपाठः)

## ③+०३ जपः

### ④०१ गायत्री

गायत्रीं पच्छो ऽर्धर्चशो ऽनवानम् उक्त्वा

⑥११ ११ व्याहृतीर्विहृताः

व्याहृतीर् विहृताः - पादादिष्व् अन्तेषु वा, तथार्धर्चयोर्, उत्तमां कृत्स्नायाम् ११

(आद्युच्चारणपक्षे)

⑥पादशः

ओं भूस् तत् स॒वि॒तुर् वरे॑ण्य(णिय)म्।
ओं भुव॒र् (पापादि)भर्गो॑(=भर्जनम्) दे॒वस्य॑ धीमहि(←ध्यै ध्याने / धी आराधने) ।
ओं सुव॒र् धियो॒ यो नः॑ प्रचो॒दया॑त् ॥

⑥अर्धशः पूर्णश्च

ओं भूस् तत् स॒वि॒तुर् वरे॑ण्य(णिय)म् (पापादि)भर्गो॑(=भर्जनम्) दे॒वस्य॑ धीमहि(←ध्यै ध्याने / धी आराधने)
।
ओं भुव॒र् धियो॒ यो नः॑ प्रचो॒दया॑त् ॥

ओं सुव॒स्

▼ १० तत्सवितुर्वरेण्यं भर्गो

तत् स॑वि॒तुर् वरे॑ण्य॒(णिय)॑म्
भर्गो॑(=भर्जनम्) दे॒वस्य॑ धीमहि(←धा धारणे/ ध्यै ध्याने / धी आराधने) ।
धियो॒ यो नः॑ प्रचो॒दया॑त् ॥
(प॒रो-र॑जसे॒ ऽसाव॒द् ओ३म् ॥)

⑥पुनः पूर्णोच्यते कैश्चित्

ॐ भूर्-भुव॒स्-सुव॒स्

▾ १० तत्सवितुर्वरेण्यं भर्गो

तत् स॑वि॒तुर् वरे॑ण्य॒(णिय)॑म्
भर्गो॑(=भर्जनम्) दे॒वस्य॑ धीमहि(←धा धारणे/ ध्यै ध्याने / धी आराधने) ।
धियो॒ यो नः॑ प्रचो॒दया॑त् ॥
(प॒रो-र॑जसे॒ ऽसाव॒द् ओ३म् ॥)

▾

## ④०२ वेदादीन् जपित्वा

वेदादीन् जपित्वा

▾ वेदादयः

अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् । होता॑रं रत्न॒धात॑मम् ॥

इ॒षे त्वा। ऊ॒र्जे त्वा। वा॒यव॑स्थोपा॒यव॑स्थ। दे॒वो वः॑ सवि॒ता प्रार्प॑यतु॒ श्रेष्ठ॑तमाय॒ कर्म॑णे ॥

▾ १० अग्न आ

अग्न॒ **आ या॑हि** वी॒तये॑ (=हविर्भक्षणाय)
**गृणा॒नो** (=स्तूयमानः) ह॒व्यदा॑तये (देवेभ्यः) ।
नि होता॑ **सत्सि** ब॒र्हिषि॑ ।।

▾ ०४ शं नो

शं नो॑ दे॒वीर॒भिष्ट॑य
आपो॑ भवन्तु पी॒तये॑ ।
शं योर्(=[अ]मिश्रणाय) अ॒भि स्र॑वन्तु नः ॥ ०४॥

▾

## ④०३ 'कृणुष्वपाज' इत्यनुवाकम्

'कृणुष्वपाज' इत्यनुवाकम् 'मदेचिदस्य' इत्यर्धर्चम् अपोह्य,

▾ ००४ कृणुष्व पाजः

⑥परिचयः

- सायणः /- तैत्तिरीयभाष्ये अत्र। ऋग्भाष्ये अत्र।
- तत्रैव 'मदे चिदस्य ' इत्यर्धर्चम् एवोद्धृत्य। तैत्तिरीयभाष्ये अत्र।

⑥आह्वानम्

▾ ०१ कृणुष्व पाजः

कृ॒णु॒ष्व पाजः॒ (=तेजः) प्रसि॑तिं॒ (=जालं) न पृ॒थ्वीं
या॒हि राजे॒वाम॑वा॒ꣳ (=सहवान्) इभे॑न ।
तृ॒ष्वीम् (=वेगम्) अनु॒ प्रसि॑तिं (=सैन्यं) द्रूणा॒नो
ऽस्ता॑ऽसि॒ विध्य॑ र॒क्षस॒स् तपि॑ष्ठैः ॥

⑥युद्धप्रार्थना

▾ ०२ तव भ्रमास

तव॑ भ्र॒मास॑ आशु॒या प॑त॒न्त्य् अनु॑
स्पृश धृष॒ता (=अभिभवता) शोशु॑चानः ।
तपू॑ꣳष्य् अग्ने जु॒ह्वा॑ पत॒ङ्गान्
अस॑न्दितो॒ (=अनिरुद्धः) वि सृ॑ज॒ विष्व॑ग् उ॒ल्काः ॥

▾ ०३ प्रति स्पशो

प्रति॒ स्पशो॒ वि सृ॑ज॒ तूर्णि॑तमो॒
भवा॑ पा॒युर् वि॒शो अ॒स्या अद॑ब्धः ।
यो नो॑ दू॒रे अ॒घश॑ꣳसो॒ यो अन्त्य् अग्ने
माकि॑ष्टे॒ व्यथि॒र् (=बाधकः) आद॑धर्षीत् ॥

▾ ०४ उदग्ने तिष्ठ

उद् अ॑ग्ने तिष्ठ॒ प्रत्याऽऽत॑नुष्व
न्य् अ॒मित्रा॒ꣳ ओषतात् (=प्रदह) तिग्म-हेते ।
यो नो॒ अरा॑ति॒ꣳ समिधान च॒क्रे
नी॒चा तं ध॑क्ष्य् (=दह) अत॒सं (=काष्ठविशेषः) न शुष्क॑म् ॥

▾ ०५ ऊर्ध्वो भव

ऊ॒र्ध्वो भ॑व॒ प्रति॑ वि॒ध्या-
+ध्य् अ॒स्मद् आ॒विष् कृ॑णुष्व॒ दैव्या॒न्य् अग्ने ।
अव॑ स्थि॒रा त॑नुहि यातु-जू॒नां(=प्रेरकाणां)
जा॒मिम् (=ज्ञातिं) अजा॑मिं॒ प्र मृ॑णीहि॒ (=जहि) शत्रू॑न् ॥

⑥उपासकसौभाग्यम्

▾ ०६ स ते

स ते॑ जानाति सुम॒तिं य॑विष्ठ
य ईव॑ते॒ (=गमनशीलाय) ब्रह्म॑णे (=पुष्टाय) गा॒तुम् ऐर॑त् (=प्रेरयति) ।
विश्वा॑न्य् अस्मै सु॒दिना॑नि रा॒यो
द्यु॒म्नान्य् अ॒र्यो वि दुरो॑ (=गृहान्) अ॒भि द्यौ॑त् (=द्योतस्व) ॥

▾ ०७ सेदग्ने अस्तु

सेद्(=स+इत्) अ॑ग्ने अस्तु सु॒भग॑स् सु॒दानु॒र्
यस् त्वा॒ नित्ये॑न ह॒विषा॒ य उ॒क्थैः ।
पिप्री॑षति॒, स्व आयु॑षि दुरो॒णे (=गृहे) (तिष्ठतु)
विश्वेद् अ॑स्मै सु॒दिना॒ सा ऽस॑द्(=भूयात्) इ॒ष्टिः ॥

⑥प्रतिज्ञा

▾ ०८ अर्चामि ते

अर्चा॑मि ते सुम॒तिं, घोष्य् (=घोषवती) अ॒र्वाक्(=पुरतः)
सम्+ ते॑ वा॒वाता॑(=पुनः पुनः) जरताम् (=स्तौतु) इ॒यं गीः ।
स्वश्वा॑स् त्वा सु॒रथा॑ मर्जयेमा(=अलङ्कुर्याम)
ऽस्मे(=अस्मासु) क्ष॒त्राणि॑ धारये॒र् अनु॒ द्यून् (=अन्वहम्) ॥

▾ ०९ इह त्वा

इ॒ह त्वा॒ भूर्या॑ च॑रे॒द् उप॒ (आ)त्मन्
दोषा॑वस्त॒र् (=रात्रावहः) दीदि॒वाꣳस॒म् अनु॒ द्यून्(=अन्वहम्) ।
क्रीड॑न्तस् त्वा सु॒मन॑सस् सपेम(=परिचरेमा)
+अ॒भि द्यु॒म्ना त॑स्थि॒वाꣳसो॒ जना॑नाम् ॥

▾ १० यस्त्वा स्वश्वः

यस् त्वा॒ स्व॒-अश्वः॑स् सुहिर॒ण्यो अ॑ग्न
उ॒प॒याति॒ वसु॑मता॒ रथे॑न ।
तस्य॑ त्रा॒ता भ॑वसि॒ तस्य॑ सखा॒
यस् त॑ आति॒थ्यम् आ॑नु॒षग् (=अनुक्रमेण) जुजो॑षत् ॥

▾ ११ महो रुजामि

म॒हो (=महद्राक्षसान्) रु॑जामि (=भनज्मि) ब॒न्धुता॒(~बन्धुतया)
वचो॑भि॒स् तन् मा॑ पि॒तुर् गोत॑माद् अन्वि॑याय ।
त्वन् नो॑ अ॒स्य वच॑सश् चिकिद्धि
होत॑र् यविष्ठ सुक्रतो॒ दमू॑नाः (=दान्तमनाः)॥

⑥किरणकीर्तिः

▾ १२ अस्वप्नजस्तरणयः सुशेवा

अस्व॑प्नजस् त॒रण॑यस् सु॒शेवा॒ (=सुमुखाः)
अत॑न्द्रासो ऽवृ॒का(=अहिंसका) अश्र॑मिष्ठाः ।
ते (रश्मयः) पा॒यव॑स् स॒ध्रिय॑ञ्चो (=सङ्गताः)
नि॒षद्या॑(=उपविश्य)ऽग्ने॒ तव॑ नः पान्त्व् अमूर (=अमर्त्य) ॥

▾ १३ ये पायवो

(उतथ्यभार्या ममता। तस्याम् बृहस्पतिर् रेतः स्थापयितुम् अयतत। तत्र वर्तमानं रेतोऽन्तरम् आक्षिपत्। बृहस्पतिर् अशपत् तम् दीर्घतमा भवेति। सोऽ अग्नेर् अलभत चक्षुः।)

ये पा॒यवो॑ मामते॒यन् ते॑ अग्ने
पश्य॑न्तो अ॒न्धन् दु॑रि॒ताद् अर॑क्षन् ।
र॒रक्ष॒ तान्त् सु॒कृतो॑ वि॒श्ववे॑दा॒
दिप्स॑न्त॒ (दम्भितुकामाः) इद् रि॒पवो॒ ना ह॑ देभुः (=परिभवन्ति) ॥

⑥प्रतिज्ञानुवर्तनम्

▾ १४ त्वया वयं

त्वया॑ व॒यꣳ स॑ध॒न्य॑स् त्वोता॒स् (त्वया +अविताः=रक्षिताः)
तव॒ प्रणी॑त्याऽश्याम॒ वाजा॑न् (=अन्नानि) ।
उ॒भा (पाप) शꣳसा॑ (शत्रू) सूदय सत्यताते
ऽनुष्ठु॒या कृ॑णुह्य् अह्रयाण (=अह्रीः) ॥

▾ १५ अया ते

अ॒या (=अनया) ते॑ अग्ने स॒मिधा॑ विधेम
प्रति॒ स्तोम॑ꣳ श॒स्यमा॑नं गृभाय (=गृहाण) ।
दहा॒ ऽशसो॑ (=अशंसो) र॒क्षसः॑ पा॒ह्य॑स्मान्
द्रु॒हो नि॒दो (=निन्दकात्) मि॑त्रमहो (=मित्रपूज्य!) अव॒द्यात्(=परिवादात्) ॥

▾ ०१ रक्षोहणं वाजिनम्

र॒क्षो॒हणं॑ वा॒जिन॑म् (=अन्नवन्तम्) आऽऽजि॑घर्मि (=दीपयामि)
मि॒त्रं प्रथि॑ष्ठ॒म् (=विस्तीर्णतमम्) उप॑यामि॒ शर्म॑ ।
शिशा॑नो (=तीक्ष्णः) अ॒ग्निः क्रतु॑भि॒स् समि॑द्धस्
स नो॒ दिवा॒ स रि॒षः (=हिंसकात्) पा॑तु॒ नक्त॑म् ॥

⑥रक्षोहाभिध्यानम्

▼ ०१ वि ज्योतिषा

वि ज्योति॑षा बृह॒ता **भा॑त्य्** अ॒ग्निर्  
आ॒विर् विश्वा॑नि **कृणुते** महि॒त्वा (=महत्तया) ।  
प्रादे॑वीर् मा॒यास् **संहते** दु॒रेवाः॒ (=दुरत्ययः)  
**शिशी॑ते** (=तीक्ष्णीकरोति) शृङ्गे॒ रक्ष॑से वि॒निक्षे॑ (=विनाशाय) ॥

▼ १० उत स्वानासो

उ॒त स्वा॒नासो॑ (=सस्वनाः) दि॒वि ष॑न्त्व् अ॒ग्नेस्  
ति॒ग्मायु॑धा॒ रक्ष॑से॒ हन्त॒ वा उ॑ ।  
[(अस्माकं) मदे॑ (=मदाय) चिदस्य॒ प्ररु॑जन्ति॒ (=भञ्जन्ति (अदेवीः)) भामा॒(=भासः रश्मयो),  
न व॑रन्ते (अस्मान्) परि॒बाधो॒ अदे॑वीः ॥ ]

▼

## ④०४ 'इन्द्रं वो विश्वतस्परि'

'इन्द्रं वो विश्वतस्परि हवामहे' इत्यनुवाकं"

▼ १२ काम्येष्टिमन्त्राः

⑥पशुकामस्यैन्द्रेष्टेः

⑥पुरोनुवाक्या

▼ १० इन्द्रं वो

इन्द्रं॑ वो वि॒श्वत॒स् परि॑  
**हवा॑महे॒** जने॑भ्यः ।  
अ॒स्माक॑म् **अस्तु॒** केव॑लः ॥

▼ 010

⑥याज्या

▼ ०१ इन्द्रं नरो

इन्द्रं॒ नरो॑ ने॒म(=खण्ड)-धि॑ता (→सङ्ग्रामे) हवन्ते (=ह्वयन्ति)  
यत् पार्या॑ (←पार, साम्नि भेदः) यु॒नज॑ते (=प्रयुज्यन्ते) धिय॑स् ताः ।  
शूरो॒ नृ-षा॑ता (=सम्भक्ता) शव॑सश् चका॒न (कामयमानः)

(सामवेदे भेदः)  
आ गोम॑ति व्र॒जे भ॑जा॒ त्वं न॑ः ।।

▼ 001

⑥इन्द्रियावद्यागे

⑥पुरोनुवाक्या

▼ ०१ इन्द्रियाणि शतक्रतो

**इन्द्रि॒याणि॑** शतक्रतो॒  
या ते॒ जने॑षु प॒ञ्चसु॑ ।  
इन्द्र॒ तानि॑ त॒ **आ वृ॑णे** ॥

▼ 009

⑥याज्या

▼ ०८ अनु ते

**अनु॑** ते **दायि**(=दीयते) म॒ह(=महते) इ॑न्द्रि॒याय॑  
स॒त्रा(=यज्ञेषु), ते॒ विश्व॑म् **अनु॑** वृ॒त्र-ह॒त्ये॑(=हत्यायै) ।  
**अनु॑** क्ष॒त्रम्, **अनु॒** सहो॑ यज॒त्र(=यष्टव्य)

- इन्द्रं॑ दे॒वेभि॒र्, **अनु॑** ते नृ॒-षह्ये॑ ॥

▼ 008

⑥घर्मवद्यागे

⑥पुरोनुवाक्या

▼ आ यस्मिन्

आ यस्मि॑न्त्स् (विषुवकाले रोहिण्यां स्थिते पुरा) स॒प्त (कृत्तिकास्थाः अश्वाः?) **वा॑स॒वास्**  
**तिष्ठ॑न्ति** स्व्-आ॒रुहो॑ यथा ।  
ऋषि॑र्(→सूर्यः) ह दी॒र्घ-श्रुत्त॑म॒  
इन्द्र॑स्य घ॒र्मो॑(→सूर्यः, प्रवर्ग्यपात्रम्) अति॑थिः ॥

▼ आ यस्मिन्

⑥याज्या

▼ ०७ आमासु पक्वमैरय

(इन्द्र!) आ॒मासु॑(=अपक्वासु) प॒क्वम् **ऐर॑य॒**(ः)  
आ सूर्यं॑ (अ)**रोहयो** दि॒वि (रोहिण्याम् पुरा विषुवकाले, पणिभिर् युद्धा)।  
घ॒र्मं(=प्रवर्ग्यपात्रम्, सूर्यम्) न साम॑न् तपता सुव्-ऋ॒क्तिभि॒र्(←ऋक् | वृज्)  
जुष्टं॒ गिर्-व॑णसे(=प्रीतये [इन्द्राय]) बृ॒हत् ॥

▼ 007

⑥अर्कवद्-यागे

⑥पुरोनुवाक्या

▼ ०१ इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः

इन्द्र॒म् इद् गा॒थिनो॑(=गायकाः) बृ॒हद्(साम्ना)  
इन्द्र॑म् अ॒र्केभि॑र्(←अर्च्, ऋक्) अ॒र्किणः॑ ।  
इन्द्रं॒ वाणी॑र्(→यजूंषि) **अनूषत**(←णु स्तुतौ) ॥

▼ 001

⑥याज्या

▼ ०१ गायन्ति त्वा

**गाय॑न्ति** त्वा गाय॒त्रिणो  
**ऽर्च॑न्त्य्** अ॒र्कम् अ॒र्किणः॑(←ऋक्) ।  
ब्र॒ह्माण॑स् त्वा शतक्रत॒  
उद् व॒ंशम् इ॑व **येमिरे** (←यम्)॥

▼ 001

⑥अंहोमुग्यागे

⑥पुरोनुवाक्या

▼ अंहोमुचे प्र

अ॒ꣳहो॒मुचे॒ प्र **भ॑रेमा** मनी॒षाम्  
ओ॑षिष्ठ॒(←ओष दाहे)-दाव्ने॑(=दात्रे) सुम॒तिङ् गृ॑णा॒नाः ।  
इ॒दम् इ॑न्द्र॒ प्रति॑ ह॒व्यङ् **गृ॑भाय**(←गृह्)  
स॒त्यास् **सं॑न्तु॒** यज॑मानस्य॒ कामाः॑ ॥

▼ अंहोमुचे प्र

⑥याज्या

▼ १४ विवेष यन्मा

**वि॒वे॒ष** यन् मा॑, धि॒षणा॑(=बुद्धिः) **ज॒जान॒**(←जन्)  
(यत्) स्तवै॑ पु॒रा पार्या॒द्(=पारेभवात्) इन्द्र॑म् अह्नः॑ ।  
अंह॑सो॒ यत्र॑ **पी॒पर॒द्**(=पारयति) यथा॑ नो  
ना॒वेव॒ यान्त॑म् उ॒भये॑ (तीरस्था) **हवन्ते** ॥

▼ 014

⑥याज्या

▼ विश्वास-प्रस्तुतिः

प्र स॒म्राज॑म्, प्रथ॒मम् अ॑ध्व॒राणा॑म्, [48]  
अ॒ꣳहो॒मुचं॑वँ, वृ॒ष॒भयँ॒ य॒ज्ञिया॑नाम् ।  
अ॒पान् नपा॑तम्, अ॒श्विना॒ हय॑न्तम्(←हय गतौ)  
अ॒स्मिन् न॑र इन्द्रि॒यन् ध॑त्त॒म् ओज॑ः ॥

▼ सर्वाप् टीकाः

⑥वैमृधयागे

⑥पुरोनुवाक्या

▼ विश्वास-प्रस्तुतिः

वि न॑ इन्द्र॒ मृधो॑(=योद्धॄन्) जहि  
नी॒चा य॑च्छ पृतन्य॒तः(←पृतना + क्यच्) ।  
अ॒ध॒स्-प॒दन् तम् ई॑ङ् कृधि  
यो अ॒स्माꣳ अ॑भि॒दास॑ति(←दसु उपक्षये) ॥

▼ सर्वाप् टीकाः

⑥याज्या

▼ ०३ इन्द्र क्षत्रमभि

इन्द्र॑ **क्ष॒त्रम्** अ॒भि वा॒मम् ओजो  
**ऽजा॑यथा** वृषभ चर्षणी॒नाम् ।  
**अपा॑नुदो॒** जन॑म् अमित्र॒यन्त॑म्  
उ॒रुं दे॒वेभ्यो॑ **अकृणोरु** लो॒कम् ॥

▼ 003

⑥याज्या

▼ विश्वास-प्रस्तुतिः

**मृ॒गो** न भी॒मx कु॑च॒रो गि॑रि॒ष्ठाω  
प॑रा॒वतः॒ [49] **आ ज॑गामा॒** पर॑स्याः ।  
सृ॒कꣳ(←सृ|सृक्) **स॒ꣳशा॑य** प॒विम् इ॑न्द्र ति॒ग्मवँ॒  
वि शत्रू॑न् ताढि॒ वि मृधो॑(=योद्धॄन्) **नुदस्व** ॥

▼ सर्वाप् टीकाः

⑥याज्या

▼ विश्वास-प्रस्तुतिः

वि शत्रू॒न् वि मृधो॑ नुद॒  
वि वृ॒त्रस्य॒ हनू॑ रुज ।  
वि म॒न्युम् इ॑न्द्र भामि॒तो॑  
ऽमित्र॑स्याभि॒दास॑तः ॥

▼ सर्वाप् टीकाः

⑥त्रातृयागे

⑥पुरोनुवाक्या

▼ विश्वास-प्रस्तुतिः

त्रा॒तार॒म् इन्द्र॑म् अवि॒तार॒म् इन्द्र॒ꣳ॒  
हवे॑हवे सु॒हव॒ꣳ॒ शूर॒म् इन्द्र॑म् ।  
**हु॒वे** नु श॒क्रम् पु॑रुहू॒तम् इन्द्र॑ꣳ  
स्व॒स्ति नो॑ म॒घवा॑ **धा॒त्व्** इन्द्र॑ः ॥

▼ सर्वाप् टीकाः

⑥याज्या

▼ विश्वास-प्रस्तुतिः

**मा** ते॑ अ॒स्याम् [50] सहसाव॒न्(←सहः)
परि॑ष्टाव(=परितः) अ॒घाय॑ **भूम** हरिव॒ः, परा॒दै(=परादातुम्) ।
**त्राय॑स्व** नो ऽवृ॒केभि॒र् वरू॑थै॒स्(=गृहैः)
तव॑ **प्रि॒यास॑स्** सू॒रिषु॑ **स्याम** ॥

▼ सर्वाष् टीकाः

⑥अर्कोश्वमेधवद्यागे

⑥पुरोनुवाक्या

▼ ०४ अनवस्ते रथमश्वाय

अन॑वस् ते **रथ॒म्** अश्वा॑य **तक्ष॒न्**
त्वष्टा॒ **वज्र॑** पु॒रुहूत द्यु॒मन्त॑म् ।
ब्र॒ह्माण॒ **इन्द्र॑** म॒हय॑न्तो अ॒र्कैर्
**अव॑र्धय॒न्** अह॑ये॒ हन्त॒वा उ॑ ॥

▼ 004

⑥याज्या

▼ ०५ वृष्णे यत्ते

वृष्णे॒ यत् ते॒ वृष॑णो(→मरुतः, ग्रावाणः) अ॒र्कम् **अर्चा॒न्**
इन्द्र॒ ग्रावा॑णो॒(→मेघाः) अदि॑तिः स॒जोषाः॑ ।
अ॒न॒श्वासो॒ ये प॒वयो॑(=नेमयः, वज्राणि) ऽर॒था
इन्द्रे॑षिता **अ॒भ्यव॑र्तन्त॒** दस्यू॑न् ॥

▼ 005

▼

### ④०५ 'यत इन्द्र'

⑤यत॑ इन्द्र

▼

⑥26 यत इन्द्र

यत॑ इन्द्र॒ भया॑महे
ततो॑ नो॒ अभ॑यं कृधि ।
मघ॑वञ् छ॒ग्धि (=शक्तो वर्तस्व) तव॒ तन् न॑(ः) ऊ॒तये॑(=रक्षायै, ऊ॒तिभि॑र् इति शाकले)
वि द्विषो॒ वि मृधो॑(=सङ्ग्रामान्) जहि ।।

⑤०६ 'स्वस्तिदा'

▼ ०२ स्वस्तिदा विशस्पतिर्वृत्रहा

स्व॒स्ति॒दा वि॒शस्-पति॑र्
वृ॒त्र॒हा वि॑मृधो व॒शी ।
वृषेन्द्रः॑ पु॒र **ए॑तु** नः
सोम॒-पा **अ॑भयङ्-क॒रः** ॥

⑤०७ 'महाँ इन्द्रो वज्रबाहुः'

▼ 01 महां इन्द्रो

म॒हा२ँ इन्द्रो॒ वज्र॑बाहुष्
षो॒ड॒शी **शर्म** **यच्छतु** ।
**स्व॒स्ति** नो॑ म॒घवा॑ **करो॒तु**
**हन्तु॑** पा॒प्मान॒यँ यो॑ऽस्मान् द्वेष्टि॑ ॥

⑤०८ 'सजोषा'

इति चतसृभिः(=??),

▼ ०२ सजोषा इन्द्र

स॒जोषा॑ इन्द्र॒ सग॑णो म॒रुद्भिः॒
**सोम॑ पिब** वृ॒त्र॒हा शू॑र वि॒द्वान् ।
**ज॒हि शत्रूँ॒र्** अप॒ मृधो॑ नु॒दस्व
+**अथाभ॑यं कृणुहि** वि॒श्वतो॑ नः ॥

▼

### ④०९ 'ये देवाः पुरस्सदः' इति पञ्च,

'ये देवाः पुरस्सदः' इति पञ्च,

▼ ये दे॒वा॒ः पु॑र॒स्-सदो॒

▼ विश्वास-प्रस्तुतिः

ये दे॒वा॒ः पु॑र॒स्-सदो॒ऽग्नि-ने॑त्राः [रक्षो॒-हण॒स्,
ते न॑ः पान्तु॒,
ते नो॑ऽवन्तु॒,
तेभ्यो॑ नम॒स्,
तेभ्य॒स् स्वाहा॑ ]

▼ विश्वास-प्रस्तुतिः

[ये दे॒वाः] दक्षिण॒-सदो॑ य॒म-ने॑त्राः [रक्षो॒-हण॒स्,
ते न॑ः पान्तु॒,
ते नो॑ऽवन्तु॒,
तेभ्यो॑ नम॒स्,
तेभ्य॒स् स्वाहा॑ ]

▼ विश्वास-प्रस्तुतिः

[ये दे॒वाः] पश्चा॒थ्-सद॑स् सवि॒तृ-ने॑त्राः [रक्षो॒-हण॒स्,
ते न॑ः पान्तु॒,
ते नो॑ऽवन्तु॒,
तेभ्यो॑ नम॒स्,
तेभ्य॒स् स्वाहा॑ ]

▼ विश्वास-प्रस्तुतिः

[ये दे॒वाः] उत्तर॒-सदो॒ वरु॑ण-नेत्राः [रक्षो॒-हण॒स्,
ते न॑ः पान्तु॒,
ते नो॑ऽवन्तु॒,
तेभ्यो॑ नम॒स्,
तेभ्य॒स् स्वाहा॑ ]

▼ विश्वास-प्रस्तुतिः

[ये दे॒वाः] उपरि॒-षदो॒ बृह॒स्-पति॑-नेत्राः रक्षो॒-हण॒स्,
ते न॑ः पान्तु॒,
ते नो॑ऽवन्तु॒,
तेभ्यो॑ नम॒स्,
तेभ्य॒स् स्वाहा॑ ॥

▼

### ④१० 'अग्नये रक्षोघ्ने' इति पञ्च

'अग्नये रक्षोघ्ने' इति पञ्च

▼ अग्नये॑ रक्षो॒घ्ने 5

▼ विश्वास-प्रस्तुतिः

अ॒ग्नये॑ रक्षो॒घ्ने स्वाहा॑ ।
य॒माय॑ [रक्षो॒घ्ने स्वाहा॑] ।

▼ विश्वास-प्रस्तुतिः

स॒वि॒त्रे [रक्षो॒घ्ने स्वाहा॑] ।
वरु॑णाय [रक्षो॒घ्ने स्वाहा॑] ।
बृह॒स्पत॑ये [रक्षो॒घ्ने स्वाहा॑] ।
दु॒व॑स्वते रक्षो॒घ्ने स्वाहा॑ ।

▼

### ④११ 'अग्निरायुष्मान्'

'अग्निरायुष्मान्' इति पञ्च,

▼ अग्निरायु॑ष्मान्थ्स

▼ विश्वास-प्रस्तुतिः

(हे यजमान)
अ॒ग्निरायु॑ष्मा॒न् ,
स वन॒स्पति॑भि॒रायु॑ष्मा॒न् ,
तेन॒ त्वायु॒षायु॑ष्मन्तङ्करोमि ।

सोम॒ आयु॑ष्मा॒न् स ओष॑धीभिर् [आयु॑ष्मा॒न् तेन॒ त्वायु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।]

(हे यजमान)य॒ज्ञ, स दक्षि॑णाभि॒र् आयु॑ष्मा॒न्, [तेन॒ त्वायु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।]

(हे यजमान)ब्रह्मायु॑ष्म॒त्, तद्ब्रा॑ह्म॒णैरायु॑ष्मत् , [तेन॒ त्वायु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।]

(हे यजमान)दे॒वा आयु॑ष्मन्तः।
ते॑ऽमृते॑न [आयु॑ष्मन्तः] [तेन॒ त्वायु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।]

▼

### ④१२ 'यावामिन्द्रावरुणे'ति, 'यो वामिन्द्रावरुणा',

'यावामिन्द्रावरुणे'ति चतुरः, 'यो वामिन्द्रावरुणा' इत्यष्टौ पर्यायान्,

[[3]]

▼ Y A v Am

▼ विश्वास-प्रस्तुतिः

या वा॑म् इन्द्रा-वरुणा यत॒व्या॑ त॒नूस्
तये॒मम् अ॑ꣳहसो मुञ्चतम् ।

▼ विश्वास-प्रस्तुतिः

या वा॑म् इन्द्रावरुणा
सह॒स्या॑ [त॒नूस्तये॒म् अमꣳहसो मुञ्चतम्] ।

▼ विश्वास-प्रस्तुतिः

[या वा॑मिन्द्रावरुणा] रक्ष॒स्या॑ [त॒नूस् तये॒मम् अꣳहसो मुञ्चतम्] ।

▼ विश्वास-प्रस्तुतिः

[या वा॑मिन्द्रावरुणा] तेज॒स्या॑ त॒नूस् तये॒मम् अꣳहसो मुञ्चतम् ।

▼ विश्वास-प्रस्तुतिः

यो वा॑म् इन्द्रा-वरुणाव् अ॒ग्नौ स्रा॒म॒स्
तवँ॒ वा॑म् ए॒तेनाव॑यजे ।

▼ विश्वास-प्रस्तुतिः

यो वा॑म् इन्द्रा-वरुणा द्वि॒पाथ्सु॑ प॒शुषु॒ [स्राम॒स् तवँ॒ वा॑म् ए॒तेनाव॑ यजे ।]

▼ विश्वास-प्रस्तुतिः

[यो वा॑म् इन्द्रा-वरुणा] चतु॑ष्पाथ्सु प॒शुषु॒ [स्राम॒स् तवँ॒ वा॑म् ए॒तेनाव॑ यजे ।]

▼ विश्वास-प्रस्तुतिः

[यो वा॑म् इन्द्रा-वरुणा] गो॒ष्ठे [स्राम॒स् तवँ॒ वा॑म् ए॒तेनाव॑ यजे ।]

▼ विश्वास-प्रस्तुतिः

[यो वा॑म् इन्द्रा-वरुणा] गृ॒हेषु॒ [स्राम॒स् तवँ॒ वा॑म् ए॒तेनाव॑ यजे ।]

▼ विश्वास-प्रस्तुतिः

[यो वा॑म् इन्द्रा-वरुणाव्] अ॒प्सु [स्राम॒स् तवँ॒ वा॑म् ए॒तेनाव॑ यजे ।]

▼ विश्वास-प्रस्तुतिः

[यो वा॑म् इन्द्रा-वरुणाव्] ओष॑धीषु॒ [स्राम॒स् तवँ॒ वा॑म् ए॒तेनाव॑ यजे ।]।

▼ विश्वास-प्रस्तुतिः

[यो वा॑म् इन्द्रा-वरुणा] वन॒स्पति॑षु॒ स्राम॒स् तवँ॒ वा॑म् ए॒तेनाव॑ यजे ।

▼

## ④१३ 'अग्ने यशस्विन्' इति चतस्रः

'अग्ने यशस्विन्' इति चतस्रः

▼ 23 अग्ने यशस्विन्

अग्ने॑ यशस्वि॒न् यश॑से॒मम् (यजमानं) **अर्प॑य॒**
+इन्द्रा॑वती॒म् अप॑चिती॒म्(=पूजां) **इ॒हाव॑ह** । अ॒यम् मू॒र्धा प॑रमे॒ष्ठी सु॒वर्चा᳚ः,
समा॒नाना॑म् **उत्त॒मश्लो॑को अस्तु॒** ।

▼ 27 भद्रम् पश्यन्त

भ॒द्रम् **पश्य॑न्त॒ उप॑ सेदु॒र्** अग्रे॒
तपो॑ (उपसल्-लक्षणां) दी॒ख्षाम् ऋष॑यस् सु॒व॒र्-विद॑ः ।
तत॑ः ख्ष॒त्रम् ब॒लम् ओज॑श् च **जा॒तन्**
तद् अ॒स्मै दे॒वा **अ॒भि सन्न॑मन्तु॒** ।

▼ 31 धाता विधाता

धा॒ता वि॑धा॒ता प॑र॒मोत स॒न्दृक्
प्र॒जाप॑तिः᳚ परमे॒ष्ठी वि॒राजा᳚ ।
स्तोमा॒श् छन्दा॑ꣳसि नि॒विदो॑ म **आहु॒र्**
ए॒तस्मै॑ रा॒ष्ट्रम् **अ॒भि सन्न॑माम** ।

▼ 35 अभ्यावर्तध्वम् उप

**अ॒भ्याव॑र्तध्व॒म्** उप॒ मेत॑ सा॒कम्
अ॒यꣳ शा॒स्ता ऽधि॑पतिर् वो **अस्तु** ।
अ॒स्य वि॒ज्ञान॒म् **अनु॒ सꣳ र॑भध्वम्**
इ॒मम् प॒श्चाद् **अनु॑ जीवाथ॒** सर्वे᳚ ।

▼

## ④१४ 'ऋताषा'डिति सानुषङ्गम्

'ऋताषा'डिति सानुषङ्गम् अनुवाकं

▼ बोधायनीये विशेषः (श्रीनिवास-देशिकः)

अत्रापि कश्चिद् विशेषः बोधायनीये दृश्यते,

> ऋ॒ता॒षाडृ॒तधा॑मा॒ऽग्निर्ग॑न्ध॒र्वस्
> स इ॒दम्ब्रह्म॑ ख्ष॒त्रम्पा॑तु॒
> तस्मै॒ स्वाहा॒
>
> तस्यौष॑धयोऽप्स॒रस॒ ऊर्जो॒ नाम॒ ता इ॒दम्ब्रह्म॑ ख्ष॒त्रम्पा᳚न्तु॒
> ताभ्य॒स्स्वाहा॑

इति पुंलिङ्गपदानि पुंलिङ्गपदेन,
स्त्रीलिङ्गपदानि स्त्रीलिङ्गपदेन च संयोज्य कथयितव्याः
आहत्य द्वाविंशतिर्मन्त्राः ।

▼ विश्वास-टिप्पनी

तद्-अनुवाकस्थ-मन्त्रैः जयादि-होमे क्रियमाणे
गन्धर्व-होम-मन्त्र एव तद्-अप्सरसां कीर्तनं कृत्वा
"तस्मै स्वाहा" इति गन्धर्वाय होमं कृत्वा,
"ताभ्यः स्वाहा" इति सर्वत्र सर्व-नाम-शब्देनैव अप्सरसो होम
इति कपर्दि-मतानुसारेण पन्थाः सूचितः ॥

विश्वेदेवा ऋषयः

▼ विश्वास-प्रस्तुतिः

ऋ॒ता॒षाड् (=ऋतेन शाततीति) ऋ॒तधा॑मा॒ ऽग्निर् ग॑न्ध॒र्वः। स इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑तु। तस्मै॒ स्वाहा॑।
तस्यौष॑धयोऽप्स॒रस॒ ऊर्जो॒ नाम॑। ता इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑न्तु। ताभ्य॒ः स्वाहा॑ ।

▼ विश्वास-प्रस्तुतिः

स॒ꣳहि॒तो वि॒श्व-सा॑मा॒ सूर्यो॑ गन्ध॒र्वस् [स इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑तु। तस्मै॒ स्वाहा॑।]
तस्य॒ मरी॑चयोऽप्स॒रस॑ आ॒यु॒वो॒ [+नाम॑। ता इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑न्तु। ताभ्य॒ः स्वाहा॑ ।]

▼ विश्वास-प्रस्तुतिः

सु॒-षु॒म्नस् सूर्य-रश्मिश् च॒न्द्रमा॑ गन्ध॒र्वः, [स इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑तु। तस्मै॒ स्वाहा॑।]
तस्य॒ नख्ष॑त्राण्य् अफ्स॒रसो॑ बे॒कुर॑यो॒ [+नाम॑। ता इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑न्तु। ताभ्य॒ः स्वाहा॑ ।]

▼ विश्वास-प्रस्तुतिः

भु॒ज्युस्सु॑प॒र्णो य॒ज्ञो ग॑न्ध॒र्वस्, [स इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑तु। तस्मै॒ स्वाहा॑।]
तस्य॒ दख्षि॑णा अफ्स॒रस॑स् स्त॒वा [+नाम॑। ता इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑न्तु। ताभ्य॒ः स्वाहा॑ ।]

▼ विश्वास-प्रस्तुतिः

प्र॒जाप॑तिर्वि॒श्वक॑र्मा॒ मनो॑ गन्ध॒र्वः, [स इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑तु। तस्मै॒ स्वाहा॑।]
तस्य॑र्ख्सा॒मान्य॑फ्स॒रसो॒ वह्न॑यो॒ [+नाम॑। ता इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑न्तु। ताभ्य॒ः स्वाहा॑ ।]

▼ विश्वास-प्रस्तुतिः

इ॒षि॒रो वि॒श्वव्य॑चा॒ वातो॑ गन्ध॒र्वः, [स इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑तु। तस्मै॒ स्वाहा॑।]
तस्यापो᳚ऽफ्स॒रसो॑ मु॒दा [+नाम॑। ता इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑न्तु। ताभ्य॒ः स्वाहा॑ ।]

▼ विश्वास-प्रस्तुतिः

भुव॑नस्य पते॒ यस्य॑ त उ॒परि॑ गृ॒हा इ॒ह च॑ ।
स नो॑ रा॒स्वाज्या॑निꣳ रा॒यस्पोष॑ꣳ सु॒वीर्य॑ꣳ सव्ँवथ्स॒रीणा॑ꣳ स्व॒स्तिम् ।

▼ विश्वास-प्रस्तुतिः

प॒र॒मे॒ष्ठ्य् अधि॑पतिर् मृ॒त्युर् ग॑न्ध॒र्वः, [स इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑तु। तस्मै॒ स्वाहा॑।]
तस्य॒ विश्व॑मफ्स॒रसो॒ भु॒वो॒ [+नाम॑। ता इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑न्तु। ताभ्य॒ः स्वाहा॑ ।]

▼ विश्वास-प्रस्तुतिः

सु॒ख्षि॒तिस् सु॒भूति॑र् भ॒द्रकृ॑थ् सु॒वर्व॑ान् प॒र्जन्यो॑ गन्ध॒र्वः, [स इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑तु। तस्मै॒
स्वाहा॑।]
तस्य॑ वि॒द्युतो᳚ऽफ्स॒रसो॒ रुचो॑ [+नाम॑। ता इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑न्तु। ताभ्य॒ः स्वाहा॑ ।]

▼ विश्वास-प्रस्तुतिः

दू॒रेहे॑तिरमृ॒ड॒यो मृ॒त्युर्ग॑न्ध॒र्वः, [स इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑तु। तस्मै॒ स्वाहा॑।]
तस्य॑ प्र॒जा अ॑फ्स॒रसो॑ भी॒रु॒वो॒ [+नाम॑। ता इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑न्तु। ताभ्य॒ः स्वाहा॑ ।]

▼ विश्वास-प्रस्तुतिः

चारु॑x कृपण-का॒शी कामो॑ गन्ध॒र्वः, [स इ॒दं ब्रह्म॑ क्ष॒त्रं पा॑तु। तस्मै॒ स्वाहा॑।]
तस्या॒धयो᳚ऽफ्स॒रस॑ः शो॒चय॑न्ती॒र्नाम॒ ता इ॒दम् ब्रह्म॑ ख्ष॒त्रम् पा᳚न्तु॒ ताभ्य॒स् (अप्सरोभ्यः) स्वाहा॑॥

▼ विश्वास-प्रस्तुतिः

स नो॑ भुवनस्य पते॒ यस्य॑ त उ॒परि॑ गृ॒हा इ॒ह च॑ ।
उ॒रु ब्रह्म॑णे॒ऽस्मै ख्ष॒त्राय॒ महि॒ शर्म॑ यच्छ ॥ [21]

▼

## ④१५ 'नमो अस्तु सर्पेभ्य'

'नमो अस्तु सर्पेभ्य' इति चतस्रः,

▼ ०५ नमो अस्तु

नमो॑ अस्तु स॒र्पेभ्यो॑
ये के च॑ पृथि॒वीम् अनु॑।
ये अ॒न्तरि॑क्षे दि॒वि
तेभ्य॑स् स॒र्पेभ्यो॒ नम॑ः॥

▼ ०६ येऽदो रोचने

ये॑ऽदो, रो॑च॒ने दि॒वो,
ये वा॒ सूर्य॑स्य र॒श्मिषु॑ ।
येषा॑म् अ॒प्सु सद॑ः कृ॒तं
तेभ्य॑ः स॒र्पेभ्यो॒ नम॑ः ॥

▼ ०७ या इषवो

या इष॑वो यातु॒धाना॑ना॒ं
ये वा॒ वन॒स्पती॒ꣳ॒र् अनु॑ ।
ये वा॑ऽव॒टेषु॒(→बिलेषु) शेर॑ते॒
तेभ्य॑ः स॒र्पेभ्यो॒ नम॑ः ॥

▼

## ④१६ अयं पुरो हरिकेश

'अयं पुरो हरिकेश' इति पञ्च पर्यायान्,

▼ अयम्पुरो हरिकेशः

▼ विश्वास-प्रस्तुतिः

अ॒यम्पु॒रो हरि॑केश॒स् सूर्य॑रश्मिः ।

▼ विश्वास-प्रस्तुतिः

तस्य॑ रथगृ॒थ्सश् च॒ रथौ॑जाश्च सेनानिग्राम॒ण्यौ॑ ।

▼ विश्वास-प्रस्तुतिः

पु॒ञ्जि॒क॒स्थ॒ला च॑ कृत॒स्थ॒ला चा॑प्स॒रसौ॑ ।

▾ विश्वास-प्रस्तुतिः

या॒तु॒धाना॑ हे॒ती, रक्षा॑ꣳसि॒ प्रहे॑तिः।
[तेभ्यो॒ नम॒स्, ते नो॑ मृडयन्तु।
ते यन्द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒, तवँ॒ वो॒ जम्भे॑ दधामि]

▾ विश्वास-प्रस्तुतिः

अ॒यन् द॑क्षि॒णा वि॒श्वक॑र्मा ।

▾ विश्वास-प्रस्तुतिः

तस्य॑ रथस्व॒नश्च॒ रथे॑चित्रश्च सेनानिग्राम॒ण्यौ॑ । मे॒न॒का च॑ सहज॒न्या चा॑प्स॒रसौ॑ ।

▾ विश्वास-प्रस्तुतिः

द॒ङ्क्ष्णव॑ः प॒शवो॑ हे॒तिः, पौरु॑षेयो व॒धः प्रहे॑तिः।
[तेभ्यो॒ नम॒स्, ते नो॑ मृडयन्तु।
ते यन् द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒, तवँ॒ वो॒ जम्भे॑ दधामि]

▾ विश्वास-प्रस्तुतिः

अ॒यम्प॒श्चाद्वि॒श्वव्य॑चाः ।
तस्य॒ रथ॑प्रोत॒श्चास॑मरथश्च सेनानिग्राम॒ण्यौ॑ ।
प्र॒म्लोच॑न्ती चानु॒म्लोच॑न्ती चाप्स॒रसौ॑
स॒र्पा हे॒तिर्, व्या॒घ्राः प्रहे॑तिः।
[तेभ्यो॒ नम॒स्, ते नो॑ मृडयन्तु।
ते यन् द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒, तवँ॒ वो॒ जम्भे॑ दधामि]

▾ विश्वास-प्रस्तुतिः

अ॒यम् उ॑त्त॒राथ् स॒यँद्-व॑सुः ।
तस्य॑ से॒नजि॑च्च सु॒षेण॑श्च सेनानिग्राम॒ण्यौ॑ ।
वि॒श्वाची॑ च घृ॒ताची॑ चाप्स॒रसौ॑ ।
आपो॑ हे॒तिर्, वात॒ः प्रहे॑तिः ।
[तेभ्यो॒ नम॒स्, ते नो॑ मृडयन्तु।
ते यन् द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒, तवँ॒ वो॒ जम्भे॑ दधामि]

▾ विश्वास-प्रस्तुतिः

अ॒यम् उ॒पर्य् अ॒र्वाग्-व॑सुः ।
तस्य॒ ताक्ष्य॒श्चारि॑ष्टनेमिश्च सेनानिग्राम॒ण्यौ॑ ।
उ॒र्वशी॑ च पू॒र्व-चि॑त्तिश् चाप्स॒रसौ॑ ।
वि॒द्युद्+हे॒तिर्, अ॒व॒स्फू॒र्जन् प्रहे॑तिः ।

▾ विश्वास-प्रस्तुतिः

तेभ्यो॒ नमः॑ ।

▾ विश्वास-प्रस्तुतिः

ते नो॑ मृडयन्तु ।

▾ विश्वास-प्रस्तुतिः

ते यन् द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ , तवँ॒ वो॒ जम्भे॑ दधामि ।

▾

## ④१७ 'आशु॒श्शिशा॑नः'

'आशुश्शिशानः'

▾ ०४ अग्निप्रणयनाङ्गमप्रतिरथसूक्तम्

त्रिष्टुप् १३,
१५ अनुष्टुप् ।
अग्निर्ऋषिः चतुर्थकाण्डे षष्ठप्रपाठके चतुर्थोऽनुवाकः

⑥01 आशुः शिशानो - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

आ॒शुः शिशा॑नो(=तीक्ष्णो) वृष॒भो न यु॒ध्मो(=योधा)
घ॑नाघ॒नः(=घातकः) क्षोभ॑णश् चर्षणी॒नाम्(=पदातीनाम्)।
स॒ङ्क्रन्द॑नो ऽनिमि॒ष ए॑क-वी॒रः
श॒तꣳ सेना॑ **अजयत्** सा॒कम् इन्द्रः॑ ॥

⑥02 सङ्क्रन्दनेनानिमिषेण जिष्णुना - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

स॒ङ्क्रन्द॑नेनानिमि॒षेण॑ जि॒ष्णुना॑
यु॒त्-का॒रेण॑(=युद्धकारिणा) दुश्च्य॒व॒नेन॑ धृ॒ष्णुना॑(=निर्भयेन)।
तद् इन्द्रे॑ण **जयत** तत् **स॑हध्वं**
यु॒धो॑ नर॒ इषु॑-हस्तेन॒ वृष्णा॑(=कामवर्षकेन) ॥

⑥03 स इषुहस्तैः - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

स इषु॑-हस्तैः॒ स नि॑ष॒ङ्गिभि॑र् (=खड्गिभिर्) व॒शी
**सꣳस्र॑ष्टा**(=संमिश्रकः) स यु॒ध(=योद्धा) इन्द्रो॑ (पर) ग॒णेन॑।
स॒ꣳसृ॒ष्ट-जित् सो॑म॒पा बा॑हु-श॒र्ध्य्(=बली)
ऊ॒र्ध्व-ध॑न्वा प्रति॑हिताभि॒र् **अस्ता॑**(=क्षेप्ता) ॥

⑥04 बृहस्पते परि - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

बृह॑स्(=वाचस्)पते॒ परि॑ **दीया॒**(=द्रव) रथे॑न
र॒क्षो॒-हा ऽमित्राꣳ॑ **अपबाध॑मानः**।
**प्र॒भ॒ञ्जन्** सेनाः॑ प्रमृ॒णो(=प्रहिंस्रो) यु॒धा
**जय॑न्** अ॒स्माक॑म् **एध्य् अविता** रथा॑नाम् ॥

⑥05 गोत्रभिदं गोविदम् - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

गो॒त्र-भि॑दं गो॒-वि॒दं वज्र॑-बाहु॒ं
जय॑न्त॒म् अज्म॑(म) प्रमृ॒णन्त॒म् ओज॑सा।
इ॒मꣳ स॑जाता॒ अनु॑ **वीरयध्वम्**
इन्द्रꣳ॑ सखायो॒ ऽनु॒ **सꣳ र॑भध्वम्** ॥

⑥06 बलविज्ञाय स्थविरः - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

ब॒ल॒वि॒ज्ञा॒यः स्थवि॑रः॒ प्रवी॑रः॒
सह॑स्वान् वा॒जी सह॑मान उ॒ग्रः।
अ॒भिवी॑रो अ॒भिस॑त्वा(←सत्वन्=योद्धृ) स॒होजा
जैत्र॑म् इन्द्र रथ॒म् **आ ति॑ष्ठ** गो॒वित् ॥

⑥07 अभि गोत्राणि - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

अ॒भिगो॒त्राणि॒ सह॑सा **गाह॑मानो**
ऽदायो वी॒रश् श॒त-म॑न्युर् इन्द्रः॑।
दु॒श्च्य॒व॒नः पृ॑तना-षा॒ड् अ॑-यु॒ध्यो
ऽस्माक॒ꣳ सेना॑ **अवतु** प्र यु॒त्सु ॥

⑥08 इन्द्र आसाम् - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

इन्द्र॑ आसां॒ ने॒ता, बृह॒स्पति॒र्
दक्षि॑णा, य॒ज्ञः पु॒र **ए॑तु** सोमः॑।
दे॒व-से॒नाना॑म् अभिभञ्ज॒तीनां॒
जय॑न्तीनां म॒रुतो॑ **यन्त्व्** अग्रे॑ ॥

⑥09 इन्द्रस्य वृष्णो - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

इन्द्र॑स्य॒ वृष्णो॒, वरु॑णस्य॒ राज्ञ॒,
आ॒दि॒त्याना॑ं म॒रुता॒ꣳ शर्ध॑ उ॒ग्रम्।
म॒हा-म॑नसां भुवन-च्य॒वाना॒ं
घोषो॑ दे॒वानां॒ **जय॑ताम्** उद्-अ॑स्थात् ॥

⑥10 अस्माकमिन्द्रः समृतेषु - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

अ॒स्माक॑म् इन्द्रः॒ सम्-ऋ॑तेषु ध्व॒जेष्व्
अ॒स्माक॒ं या इष॑व॒स् ता **जय॑न्तु**।
अ॒स्माक॑ं वी॒रा **उत्त॑रे भवन्त्व्**
अ॒स्मान् उ॑ देवा **अवता** हवे॑षु ॥

⑥11 उद्धर्षय मघवन्नायुधान्युत्सत्वनाम् - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

**उद्+ध॑र्षय** मघव॒न्न् आयु॑धान्य्
उत् सत्व॑ना॒ं(=योद्धृणां) माम॒काना॒ं महा॑ꣳसि।
उद् वृ॑त्र-ह॒न् वा॒जिना॒ं वाजि॑नान्य्(=वेगाः)
उद् रथा॑नां **जय॑ताम् एतु घोषः॑** ॥

⑥12 उप प्रेत

▾ विश्वास-प्रस्तुतिः

**उप॒ प्रेत॒ जय॑ता** नरस्
स्थि॒रा व॑स् **सन्तु** बा॒हवः॑ ।
इन्द्रो॑ व॒श् **शर्म॑ यच्छत्व्**
अ॒ना॒धृ॒ष्या यथा **ऽस॑थ** ।

▾ सर्वाणि टीकाः

⑥13 अवसृष्टा परा पत

▾ विश्वास-प्रस्तुतिः

**अव॑सृष्टा॒ परा॑ पत**
शर॑व्ये॒ ब्रह्म॑-सꣳशिता ।
**गच्छा॒मित्रा॑न् प्र** [19] **विश**

मैषाङ् **कश्चनोच्छिंषः** ।

▼ सर्वाष् टीकाः

⑥14 मर्माणि ते

▼ विश्वास-प्रस्तुतिः

मर्माणि ते वर्मभिश् **छादयामि**
सोमस् त्वा राजा ऽमृतेनाभि **वस्ताम्** ।
उरोर् वरीयो वरिवस्(=धनम्) ते **अस्तु**
**जयन्तन्** त्वाम् **अनु मदन्तु** देवाः ।

▼ सर्वाष् टीकाः

▼ विश्वास-प्रस्तुतिः

यत्र बाणास् **सम्पतन्ति**
कुमारा विशिखा इव (चपलाः)।
इन्द्रो नस् तत्र वृत्रहा
विश्वाहा **शर्म यच्छतु** ॥ [20]

▼

④१८ 'शश्च मे',

▼ ०३ वसोर्धारा होममन्त्राः

अग्निर्ऋषिः

चतुर्थकाण्डे सप्तमप्रपाठके तृतियोऽनुवाकः

▼ विश्वास-प्रस्तुतिः

शश्च मे मयश्च मे

▼ विश्वास-प्रस्तुतिः

प्रियश्च मेऽनुकामश्च मे

▼ विश्वास-प्रस्तुतिः

कामश्च मे सौमनसश्च मे

▼ विश्वास-प्रस्तुतिः

भद्रश्च मे श्रेयश्च मे

▼ विश्वास-प्रस्तुतिः

वस्यश्च मे यशश्च मे

▼ विश्वास-प्रस्तुतिः

भगश्च मे द्रविणश्च मे

▼ विश्वास-प्रस्तुतिः

यन्ता च मे धर्ता च मे

▼ विश्वास-प्रस्तुतिः

ख्षेमश्च मे धृतिश्च मे

▼ विश्वास-प्रस्तुतिः

विश्वश्च [5] मे महश्च मे

▼ विश्वास-प्रस्तुतिः

सवँविच्च मे ज्ञात्रश्च मे

▼ विश्वास-प्रस्तुतिः

सूश्च मे प्रसूश्च मे

▼ विश्वास-प्रस्तुतिः

सीरश्च मे लयश्च म+

▼ विश्वास-प्रस्तुतिः

ऋतश्च मेऽमृतश्च मे

▼ विश्वास-प्रस्तुतिः

+ऽयख्ष्मश्च मेऽनामयच्च मे

▼ विश्वास-प्रस्तुतिः

जीवातुश्च मे दीर्घायुत्वश्च मे

▼ विश्वास-प्रस्तुतिः

+ऽनमित्रश्च मेऽभयश्च मे

▼ विश्वास-प्रस्तुतिः

सुगश्च मे शयनश्च मे

▼ विश्वास-प्रस्तुतिः

सूषा च मे सुदिनश्च मे

▼

④१९ 'ममाग्ने',

'ममाग्ने'

▼ १४ विहव्याख्येष्टकोपधानम्

त्रिष्टुप्
अग्निर्ऋषिः

चतुर्थकाण्डे सप्तमप्रपाठके चतुर्दशोऽनुवाकः

▼ ०१ ममाग्ने वर्चो

ममाग्ने वर्चो विहवेष्व् **अस्तु**
वयन् त्वेन्धानास् तनुवम् **पुषेम** ।
मह्यन् **नमन्ताम्** प्रदिशश् चतस्रस्
त्वया ऽध्यख्षेण पृतना **जयेम** ।

▼ विश्वास-प्रस्तुतिः

मम देवा विहवे **सन्तु** सर्व
इन्द्रावन्तो मरुतो विष्णुर् अग्निः ।
ममान्तरिख्षम् उरु गोपम् **अस्तु**
मह्यवँ वातꣳ **पवताङ्** कामे अस्मिन्न् ।

▼ सर्वाष् टीकाः

▼ विश्वास-प्रस्तुतिः

मयि देवा द्रविणम् **आ यजन्ताम्**
मय्य् आशीर् **अस्तु** मयि देव-हूतिः ।
दैव्या होतार् **आ**(→शाकले होतारो) **वनिषन्त**(=संभजन्तु?) [29]
पूर्वे ऽरिष्टास् **स्याम** तनुवा सुवीराः ।

▼ सर्वाष् टीकाः

▼ विश्वास-प्रस्तुतिः

मह्ययँ **यजन्तु** मम यानि हव्या
ऽऽकूतिस् **सत्या** मनसो मे **अस्तु** ।
एनो **मा नि गाङ्** कतमच्चन+अहवँ
विश्वे देवासो अधि **वोचता** मे ।

▼ ०५ देवीः षळुर्वीरुरु

देवीः षड्-उर्वीर् उरु णx **कृणोत**
विश्वे देवास इह **वीरयध्वम्** ।
**मा हास्महि** प्रजया मा तनूभिर्
**मा रधाम** द्विषते सोम राजन् ।

▼ विश्वास-प्रस्तुतिः

अग्निर् मन्युम् **प्रतिनुदन्** पुरस्ताद् [30]
अदब्धो गोपाꣳ **परि पाहि** नस् त्वम् ।
प्रत्यञ्चो **यन्तु** नि-गुतꣳ(←गु गमने) पुनस् ते
ऽमा(=सह)+एषाञ् चित्तम् प्रबुधा **वि नेशत**(=विनश्यतु) ।

▼ सर्वाष् टीकाः

▼ विश्वास-प्रस्तुतिः

धाता धातृणाम् भुवनस्य यस् पतिर्
देवꣳ सवितारम् अभिमातिषाहम् ।
इमयँ यज्ञम् अश्विनोभा बृहस्-पतिर्
देवाꣳ **पान्तु** यजमानन् न्यर्थात् ।

▼ सर्वाष् टीकाः

▼ ०८ उरुव्यचा नो

उरु-व्यचा नो महिषश् शर्म **यꣳसद्**
अस्मिन् हवे पुरुहूतꣳ पुरुख्षु ।
स नꣳ प्रजायै हर्यश्व **मृडयेन्द्र**
**मा** नो **रीरिषो** मा परा **दाः** ।

▼ ०९ ये नः

ये नस् सपत्ना **अप** ते **भवन्त्व्**
इन्द्राग्निभ्याम् अव **बाधामहे** तान् ।
वसवो रुद्रा आदित्या उपरि-स्पृशम्
मोग्रञ् चेत्तारम् अधिराजम् **अक्रन्** ।

▼ विश्वास-प्रस्तुतिः

अर्वाञ्चम् इन्द्रम् अमुतो **हवामहे**
यो गो-जिद् धन-जिद् अश्व-जिद् यः ।
इमन् नो यज्ञवँ विहवे **जुषस्व**
+अस्य **कुर्मो** हरिवो मेदिनन्(=स्नेहवन्तं) त्वा ॥ [32]

▼ सर्वाष् टीकाः

▼

④२० 'अग्नेर्मन्वे'

'अग्नेर्मन्वे' इत्यनुवाकान्,

▼ १५ अश्वमेध-याज्यानुवाक्याः मृगारम्

उपरिष्टात् ज्योतिर्जगती , ८ पङ्क्तिः १४ बृहती, २१- २२ त्रिष्टुप्
विश्वेदेवा ऋषयः

चतुर्थकाण्डे सप्तमप्रपाठके पञ्चदशोऽनुवाकः

⑥अग्निः

▼ विश्वास-प्रस्तुतिः

अ॒ग्नेर् **मं॑न्वे** प्र॒थ॒मस्य॒ प्रचे॑तसो॒
यं पाञ्चं॑जन्यं (=पञ्चभ्यो जनेभ्यो हितं) ब॒हवं॑स् **समि॒न्धते॑**।
विश्वं॑स्यां वि॒शि **प्रवि॑विशि॒वा॑ꣳसं॑म् ईमहे॒**
स नो **मु॒ञ्च॒त्व्** अꣳहं॑सः ॥

▼ सर्वाष् टीकाः
▼ विश्वास-प्रस्तुतिः

यस्ये॒दं **प्रा॒णन् निं॑मि॒षद्** यद् **एजं॑ति॒** (=कम्पते)
यस्यं॑ **जा॒तं जनं॑मानं** च॒ केवं॑लम् (जगत्)।
**स्तौम्य्** अ॒ग्निं **नां॑थि॒तो** (=फलयाञ्चावान्) **जोंहवीमि॒**
स नों॑ **मु॒ञ्च॒त्व्** अꣳहं॑सः ॥

▼ सर्वाष् टीकाः

⑥इन्द्रः

▼ विश्वास-प्रस्तुतिः

इन्द्रं॑स्य **मन्ये** प्र॒थ॒मस्य॒ प्रचे॑तसो
वृ॒त्र-घ्नः स्तोमा॒ (=स्तोत्राणि) उप॒ माम् **उ॒पागुंः**।
यो **दा॒शुषंः** सु॒कृतो॒ ह॒वम् **उप॒ गन्ता॒**
स नों॑ **मु॒ञ्च॒त्व्** अꣳहं॑सः ॥

▼ सर्वाष् टीकाः
▼ विश्वास-प्रस्तुतिः

यः सं॑ग्रा॒मं **नयं॑ति॒ संव॒शी** यु॒धे
यः पु॒ष्टानिं **सꣳसृ॒जतिं** त्र॒याणिं (गावश्वपुरुषाः)।
**स्तौमीन्द्रं** नाथि॒तो **जोंहवीमि॒**
स नों॑ **मु॒ञ्च॒त्व्** अꣳहं॑सः ॥

▼ सर्वाष् टीकाः

⑥मित्रावरुणौ

▼ विश्वास-प्रस्तुतिः

**म॒न्वे** वां॑ मित्रा-वरु॒णा॒, तस्यं॑ (वैरिणो) वित्त॒ꣳ॒
सत्यौं॑जसा **दृꣳहणा॒**(=स्तम्भयन्तौ) यन् **नु॒देथें॑**।
या राजां॑नꣳ (आदित्यं) स॒रथं॑ **या॒थ** (वृष्ट्यै) उं॑ग्रा॒
ता नों॑ **मु॒ञ्च॒तम्** आगं॑सः ॥

▼ सर्वाष् टीकाः
▼ विश्वास-प्रस्तुतिः

यो वा॒ꣳ॒ रथं॑ ऋ॒जु-रं॑श्मिः स॒त्य-धं॑र्मा॒
मिथु॒श्(=मिथ्या) **चरं॑न्तम् उ॒प॒यातिं॑ दू॒षयन्ं** ।
**स्तौमिं** मि॒त्रावरु॒णा॒ **नाथि॒तो जोंहवीमि॒** तौ नों॑ **मुंच॒तम्** आगं॑सः ।

▼ सर्वाष् टीकाः

⑥वायुः, सविता च

▼ विश्वास-प्रस्तुतिः

वा॒योस् सं॑वि॒तुर् वि॒दथा॑नि(=वेदनानि) **मन्महे**
याव् आं॑त्म॒न्वद् **बिं॑भृतो** यौ च॒ **रक्षं॑तः** ।
यौ विश्वं॑स्य **परि॒भू बं॑भूवतुस्**
तौ नों॑ **मु॒ञ्च॒तम्** आगं॑सः ॥

▼ सर्वाष् टीकाः
▼ विश्वास-प्रस्तुतिः

उप॒ श्रेष्ठां॑ न आ॒शिषों॑
दे॒वयो॒र् धर्मे॑(=कर्मणि) **अस्थिरन्**(√स्था)।
**स्तौमिं** वा॒युꣳ सं॑वि॒तारं॑ **नाथि॒तो जोंहवीमि॒**
तौ नों॑ **मुंच॒तम्** आगं॑सः ॥

▼ सर्वाष् टीकाः

⑥अश्विनौ

▼ विश्वास-प्रस्तुतिः

र॒थीतं॑मौ र॒थीना॑म् **अंह्व**(=आह्वे)
ऊ॒तये॒ शु॒भं॒ **गमिं॑ष्ठौ** सु॒यमे॑भि॒र् अश्वैः ।
ययों॑र् वां॑ दे॒वौ दे॒वेष्व् अनिं॑शि॒तम् ओजस्
तौ नों॑ **मु॒ञ्च॒तम्** आगं॑सः ॥

▼ सर्वाष् टीकाः
▼ विश्वास-प्रस्तुतिः

यद् **अयां॑तं** व॒हतु॒ꣳ॒ सू॒र्या॒यां॑स्(=तन्मातुः)
त्रि-च॒क्रेणं॑ स॒ꣳ॒ सदं॑म् **इ॒च्छमांनौ** ।
**स्तौमिं** दे॒वाव् अ॒श्विनौं॑ **नाथि॒तो जोंहवीमि॒**
तौ नों॑ **मु॒ञ्च॒तम्** आगं॑सः ॥

▼ सर्वाष् टीकाः

⑥मरुतः

▼ विश्वास-प्रस्तुतिः

म॒रुतां॑ **मन्वे॒** अधिं॑ नो **ब्रु॒वन्तु॒**
प्रेमां॑ वाचं॑ विश्वां॑म् **अवन्तु॒** विश्वें॑ ।
आ॒शून् **हुं॑वे** सु॒-यमां॑न् ऊ॒तये॒(√अव्)
ते नों॑ **मु॒ञ्च॒न्त्व्** एनं॑सः ॥

▼ सर्वाष् टीकाः
▼ विश्वास-प्रस्तुतिः

ति॒ग्मम् आयुं॑धं वी॒डि॒तꣳ(=दृढम्) सहं॑स्वद्
दि॒व्यꣳ शर्द्धः॒(=बलं) पृतं॑नासु॒ **जि॒ष्णु** ।
**स्तौमिं** दे॒वान् म॒रुतों॑ **नाथि॒तो जोहं॑वीमि॒**
ते नों॑ **मु॒ञ्च॒न्त्व्** एनं॑सः ॥

▼ सर्वाष् टीकाः

⑥विश्वे देवाः

▼ विश्वास-प्रस्तुतिः

दे॒वानां॑ मन्वे॒ अधिं॑ नो **ब्रु॒वन्तु॒**
प्रेमां॑ वाचं॑, विश्वां॑म् **अवन्तु॒** विश्वें॑ ।
आ॒शून् **हुं॑वे** सु॒यमां॑न् ऊ॒तये॒(√अव्)
ते नों॑ **मु॒ञ्च॒न्त्व्** एनं॑सः ॥

▼ सर्वाष् टीकाः
▼ विश्वास-प्रस्तुतिः

यद् इ॒दं मां॑ **ऽभि॒शोचं॑ति॒**
पौरुं॑षेयेण॒ दैव्यें॑न ।
**स्तौमि॒** विश्वां॑न् दे॒वान् **नं॑थि॒तो जोहं॑वीमि॒**
ते नों॑ **मु॒ञ्च॒त्व्** एनं॑सः ॥

▼ सर्वाष् टीकाः

⑥अनुमतिः

▼ विश्वास-प्रस्तुतिः

**अनुं॑** नो॒ऽद्यानुं॑मतिर् (=ऊनचन्द्रा पौर्णमासी)
य॒ज्ञन् दे॒वेषुं॑ **मन्यताम्** ।
अ॒ग्निश् चं॑ ह॒व्य॒वाहं॑नो॒,
**भवं॑तान्** दा॒शुषे॒ मयंः ।

▼ विश्वास-प्रस्तुतिः

**अन्व्** इद् अं॑नुमते॒ त्वम् [34]
**मन्यांसै॒** शश्चं॑ नx **कृधि** ।
क्रत्वे॒ दख्षां॑य नो **हिनु॒**(=प्रेरय)
प्र ण॒ आयूं॑ꣳषि **तारिषः** ।

⑥वैश्वानरः

▼ विश्वास-प्रस्तुतिः

**वै॒श्वा॒न॒रो** नं॑ ऊ॒त्या
**ऽऽप्र यांतु॒** परा॒वतंः ।
अ॒ग्निर् उ॒क्थेन॒ वाहं॑सा ॥

▼ सर्वाष् टीकाः
▼ ०२ पृष्टो दिवि

पृष्टो॒(←पृच्छ्) दि॒वि, पृष्टो **अ॒ग्निः** पृ॒थि॒व्यां,
पृष्टो विश्वा॒ ओषं॑धी॒र् **आ विं॑वेश** ।
वै॒श्वा॒न॒रः सहं॑सा पृ॒ष्टो अ॒ग्निः
स नो॒ दिवा॒ स रि॒षः **पांतु॒** नक्तं॑म् ॥

▼ 002

⑥द्यावा-पृथिवी

▼ विश्वास-प्रस्तुतिः

ये **अप्रं॑थेताम्** अमिं॑तेभि॒र् ओजों॑भि॒र्
ये प्रं॑ति॒ष्ठे **अभं॑वता॒वँ** व॒सूं॑नाम् । **स्तौमि॒** द्यावा॑-पृथि॒वी **नां॑थि॒तो जोंहवीमि॒**
ते नों॑ **मु॒ञ्च॒तम्** अꣳहं॑सः ।

▼ सर्वाष् टीकाः
▼ विश्वास-प्रस्तुतिः

उर्वी॑ रोदसी॒ **वरिं॑वx कृणोत॒ङ्**
ख्षेत्रं॑स्य पत्नी॒ अधिं॑ नो **ब्रूयातम्** ।
**स्तौमि॒** द्यावा॑पृथि॒वी **नां॑थि॒तो जोंहवीमि॒**
ते नों॑ **मु॒ञ्च॒तम्** अꣳहं॑सः ।

▼ सर्वाष् टीकाः

⑥स्विष्टकृत्

▼ विश्वास-प्रस्तुतिः

यत् तें॑ व॒यम् पुं॑रुष॒-त्रा यं॑विष्ठ+
अविं॑द्वाꣳसश् **चकृ॒मा** कच्च॒न [38] आगंः ।
**कृ॒धी** स्व् अं॑स्माꣳ अदिं॑ते॒र् अनां॑गा॒
व्येनां॑ꣳसि शिश्रथो॒(=दुर्बलं) विष्वं॑ग् अग्ने॥

▼ सर्वाष् टीकाः
▼ विश्वास-प्रस्तुतिः

यथा॑ ह॒ तद् वं॑सवो गौर्यं॒ञ् चित् (गाम्)
प॒दि षि॒ताम्(=बद्धां) **अमुं॑ञ्चता** यजत्राः ।
ए॒वा त्वम् अ॒स्मत् **प्र मुं॑ञ्चा॒** व्यꣳह॒ꣳ

**प्राता᳚र्य्** अग्ने, **प्रत॒रान्** न॒ आयु॑ः ॥ [39]

▾ सर्वाष् टीकाः

▾

## ④२१ 'समीची नाम'

'समीची नाम' इति षड्पर्यायान्,

▾ १४ समीची नामासि

स॒मीची॒ नामा॑सि॒ प्राची॒ दिक्। तस्यां॑स् त॒ ऽग्निर् अधि॑पतिर्, असि॒तो र॑क्षि॒ता।

▾ यश् चाधि॑पति॒र्

यश् चाधि॑पति॒र्, यश् च॑ गो॒प्ता - ताभ्यां॒ नम॒स्, तौ नो॑ मृडयताम्।
ते यं द्वि॒ष्मो, यश् च॑ नो॒ द्वेष्टि॒ - तं वा॒ं जंभे॑ दधामि ।

▾ १५ -१९ ओजस्विनी नामासि

⑥मन्त्रः

ओ॒ज॒स्विनी॒ नामा॑सि दक्षि॒णा दिक्।
तस्यां॑स् त॒ इन्द्रोऽधि॑पतिः, पृदा॑कू र॑क्षि॒ता

▾ यश् चाधि॑पति॒र्

यश् चाधि॑पति॒र्, यश् च॑ गो॒प्ता - ताभ्यां॒ नम॒स्, तौ नो॑ मृडयताम्।
ते यं द्वि॒ष्मो, यश् च॑ नो॒ द्वेष्टि॒ - तं वा॒ं जंभे॑ दधामि ।

प्राची॒ नामा॑सि प्र॒तीची॒ दिक्।
तस्यां॑स् ते॒ सोमोऽधि॑पतिः स्व॒जो र॑क्षि॒ता

▾ यश् चाधि॑पति॒र्

यश् चाधि॑पति॒र्, यश् च॑ गो॒प्ता - ताभ्यां॒ नम॒स्, तौ नो॑ मृडयताम्।
ते यं द्वि॒ष्मो, यश् च॑ नो॒ द्वेष्टि॒ - तं वा॒ं जंभे॑ दधामि ।

अ॒व॒स्थावा॒ नामा॒स्युदी॑ची दिक्।
तस्यां॑स् ते॒ वरु॑णोऽधि॑पतिस् ति॒रश्चि॑राजी र॑क्षि॒ता

▾ यश् चाधि॑पति॒र्

यश् चाधि॑पति॒र्, यश् च॑ गो॒प्ता - ताभ्यां॒ नम॒स्, तौ नो॑ मृडयताम्।
ते यं द्वि॒ष्मो, यश् च॑ नो॒ द्वेष्टि॒ - तं वा॒ं जंभे॑ दधामि ।

अधि॑पत्नी॒ नामा॑सि बृह॒ती दिक्।
तस्यां॑स् ते॒ बृह॒स्पति॒र् अधि॑पतिः श्वि॒त्रो र॑क्षि॒ता

▾ यश् चाधि॑पति॒र्

यश् चाधि॑पति॒र्, यश् च॑ गो॒प्ता - ताभ्यां॒ नम॒स्, तौ नो॑ मृडयताम्।
ते यं द्वि॒ष्मो, यश् च॑ नो॒ द्वेष्टि॒ - तं वा॒ं जंभे॑ दधामि ।

व॒शिनी॒ नामा॑सी॒यं दिक्।
तस्यां॑स् ते॒ य॒मो ऽधि॑पतिः क॒ल्माष॑-ग्रीवो र॑क्षि॒ता

▾ यश् चाधि॑पति॒र्

यश् चाधि॑पति॒र्, यश् च॑ गो॒प्ता - ताभ्यां॒ नम॒स्, तौ नो॑ मृडयताम्।
ते यं द्वि॒ष्मो, यश् च॑ नो॒ द्वेष्टि॒ - तं वा॒ं जंभे॑ दधामि ।

▾

## ④२२ 'हेतयो नामस्थ'

'हेतयो नामस्थ' इति षड्पर्यायान्

▾ २० -२५ हेतयो नामस्थ

हे॒त॒यो॒ नाम॑ स्थ॒, तेषां॑ वः पु॒रो गृ॒हा, अ॒ग्निर् व॒ इष॑वः, स॒लि॒लो वा॑त-ना॒मम्।

(वाताशिनो हि सर्पाः। तस्य वातस्य नमयिता = उपस्थापयिता। नपुंसकलिङ्गं सामान्यविवक्षायाः।)

▾ Tebhyo vo nama H

तेभ्यो॑ वो॒ नम॒स्, ते नो॑ मृडयत।

▾ ते यं द्विष्मः

▾ विश्वास-प्रस्तुतिः

ते यन् **द्वि॒ष्मो**
यश्च॑ नो॒ **द्वेष्टि॒**
तवँ॒ वो॒ **जम्भे॑ दधामि** ॥

नि॒लि॒म्पा नाम॑ स्थ॒, तेषां॑ वो दक्षि॒णा गृ॒हा, पि॒तरो॑ व॒ इष॑वः, सग॑रो वात-ना॒मम्।

▾ Tebhyo vo nama H

तेभ्यो॑ वो॒ नम॒स्, ते नो॑ मृडयत।

▾ ते यं द्विष्मः

▾ विश्वास-प्रस्तुतिः

ते यन् **द्वि॒ष्मो**
यश्च॑ नो॒ **द्वेष्टि॒**
तवँ॒ वो॒ **जम्भे॑ दधामि** ॥

व॒ज्रिणो॒ नाम॑ स्थ॒, तेषां॑ वः प॒श्चाद् गृ॒हा, स्वप्नो॑ व॒ इष॑वो॒, गह्व॑रो वात-ना॒मम्।

▾ Tebhyo vo nama H

तेभ्यो॑ वो॒ नम॒स्, ते नो॑ मृडयत।

▾ ते यं द्विष्मः

▾ विश्वास-प्रस्तुतिः

ते यन् **द्वि॒ष्मो**
यश्च॑ नो॒ **द्वेष्टि॒**
तवँ॒ वो॒ **जम्भे॑ दधामि** ॥

अ॒व॒स्थावा॑नो॒ नाम॑ स्थ॒, तेषां॑ व उत्त॒रद् गृ॒हा, आपो॑ व॒ इष॒वः, स॒मु॒द्रो वा॑तना॒मम्।

▾ Tebhyo vo nama H

तेभ्यो॑ वो॒ नम॒स्, ते नो॑ मृडयत।

▾ ते यं द्विष्मः

▾ विश्वास-प्रस्तुतिः

ते यन् **द्वि॒ष्मो**
यश्च॑ नो॒ **द्वेष्टि॒**
तवँ॒ वो॒ **जम्भे॑ दधामि** ॥

अधि॑पतयो॒ नाम॑ स्थ॒, तेषां॑ व उ॒परि॑ गृ॒हा, व॒र्षं व॒ इष॒वो, ऽव॑स्वान् वात-ना॒मम्।

▾ Tebhyo vo nama H

तेभ्यो॑ वो॒ नम॒स्, ते नो॑ मृडयत।

▾ ते यं द्विष्मः

▾ विश्वास-प्रस्तुतिः

ते यन् **द्वि॒ष्मो**
यश्च॑ नो॒ **द्वेष्टि॒**
तवँ॒ वो॒ **जम्भे॑ दधामि** ॥

क्र॒व्या नाम॑ स्थ॒ पार्थि॑वास्, तेषां॑ व इ॒ह गृ॒हा, अन्नं॑ व॒ इष॑वो, निमि॒षो वा॑तना॒मम्।

▾ Tebhyo vo nama H

तेभ्यो॑ वो॒ नम॒स्, ते नो॑ मृडयत।

▾ ते यं द्विष्मः

▾ विश्वास-प्रस्तुतिः

ते यन् **द्वि॒ष्मो**
यश्च॑ नो॒ **द्वेष्टि॒**
तवँ॒ वो॒ **जम्भे॑ दधामि** ॥

▾

## ④२३ 'शतायुधाय'

'शतायुधाय' इति पञ्च,

▾ 34 शतायुधाय शतवीर्याय

श॒तायु॑धाय श॒तवी᳚र्याय
श॒तोत॑ये ऽभिमाति॒-षाहे᳚ (नमः)। श॒तयँ॒ यो न॑श् श॒रदो॒ **अजी॑ता॒न्**
इन्द्रो॑ **नेष॒द्** अति॑ दु॒रिता॒नि विश्वा᳚ ।

▾ 38 ये चत्वार॰

ये च॒त्वार॑॰ प॒थयो॑(=पन्थानो) दे॒व॒याना॑
अन्त॒रा द्यावा॑-पृथि॒वी **वि॒यन्ति॑** ।
तेषा॒यँ॒ यो अ-ज्या॑नि॒म्(←ज्या जरायां) अ-जी॑तिम् **आ॒वहा॒त्** -
तस्मै॑ नो देवा॰ **परि॑ द॒त्तेह** सर्वे᳚ ।

▾ 42 ग्रीष्मो हेमन्त

ग्री॒ष्मो हे॑म॒न्त उ॒त नो॑ वस॒न्तश्
श॒रद् व॒र्षास् सु॑वि॒तन्(←सू) नो॑ **अस्तु** ।
तेषा॑म् ऋ॒तूना॒ँ श॒त-शा॑रदानान्
निवा॒त ए॑षा॒म् अभ॑ये **स्याम** ।

▾ 46 इदुवथ्सराय परिवथ्सराय

इ॒दु॒व॒थ्स॒राय॑(=संवत्सर+२) परिवथ्स॒राय॑(=संवत्सर+१)
स॒वँ॒वथ्स॒राय॑ **कृणुता** बृ॒हन् नम॑ः ।
तेषा᳚वँ व॒य॒ँ सु॑म॒तौ य॒ज्ञिया॑ना॒ञ्
ज्योग् अजी॑ता॒ अह॑तास् **स्याम** ।

▾ 50 भद्रान् नश्

भ॒द्रान् न॒श् श्रेय॒स् **सम॑नैष्ट** देवा॒स्!
त्वया॑ ऽव॒सेन॒(←अव=रक्षणे) **सम॑शीमहि** त्वा (सोम!)।
स नो॑ मयो॒-भू॰ पि॑तो(=अन्न) **आ वि॑शस्व॒**
शन् तो॒काय॑ त॒नुवे᳚ स्यो॒नः ।

▾

## ④२४ 'भू॒तं भ॒व्यं भ॒वि॒ष्यत्'

▾ १२ पर्याप्तिहोममन्त्राः

▾ विश्वास-प्रस्तुतिः

भू॒तं भव्यं॑ भवि॒ष्यद् वष॒ड्ढ् स्वाहा॒ नम॑ः।
ऋक् साम॒ यजु॒र् वष॒ड्ढ् स्वाहा॒ नम॑ः।
गा॒य॒त्री त्रि॒ष्टुब् जग॑ती॒ वष॒ड्ढ् स्वाहा॒ नम॑ः।

पृथिव्य् अन्तरिक्षम् द्यौर् वषड्ढ् स्वाहा नमः।
अग्निर् वायुः सूर्यो वषड्ढ् स्वाहा नमः।
प्राणो व्यानोऽपानो वषड्ढ् स्वाहा नमः।
अन्नं कृषिर् वृष्टिर् वषड्ढ् स्वाहा नमः।
पिता पुत्रः पौत्रो वषड्ढ् स्वाहा नमः।
भूर् भुवः सुवर् वषड्ढ् स्वाहा नमः ।

▾

## ④२५ 'इन्द्रो दधीचो अस्थभिः'

'इन्द्रो दधीचो अस्थभिः' इत्यनुवाकौ

▾ ०८ अथर्व-शिर-इष्टकाः - इन्द्रो दधीचो

▾ १३ इन्द्रो दधीचो

(ज्येष्ठास्थः, रोहिणीस्थो वा) इन्द्रो दधीचो (=serpens/ orion) अस्थभिर्
वृत्राण्य् अप्रतिष्कुतः ।
**जघान** नवतीर् नव (→हेमन्त-दिनानि) ।

▾ १४ इच्छन्नश्वस्य यच्छिरः

**इच्छन्न्** अश्वस्य(→यज्ञस्य) यच् छिरः(→अग्निं, उत्तरायणारम्भ-सूर्यवत् दधिक्रावाणं [pegasus])
पर्वतेष्व(→मेघेषु, हेमन्त-मासेषु) **अपश्रितम्** ।
तद् **विदच्** छर्यणावति ।



*bce-3000-01-13 rohiNI jyeShThA equinox shatabhiShak pUrva phAlgunI solstice*

▾ १५ अत्राह गोरमन्वत

अत्राह(=अस्मिन्नेव) गोर्(=गन्तुः [चन्द्रमसो]) **अमन्वत**
नाम त्वष्टुर्(=दीप्तस्यादित्यस्य उत्तरायणारम्भे) **अपीच्यम्**(=अपचितम्, अन्तर्हितम् [रात्रौ]) । इत्था(=इत्थं)
चन्द्रमसो गृहे (=अमावास्यायाम्, फाल्गुनीषु पौर्णमास्यां वा)॥

▾ ०१ इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः

इन्द्रम् इद् गाथिनो(=गायकाः) बृहद्(साम्ना)
इन्द्रम् अर्केभिर्(←अर्च्, ऋक्) अर्किणः ।
इन्द्रं वाणीर्(→यजूंषि) **अनूषत**(←णु स्तुतौ) ॥

▾ ०२ इन्द्र इद्धर्योः

इन्द्र इद्+धर्योः **सचा**(←सच् अनुसरणे)
**सम्मिश्ल** आ वचो **युजा** ।
इन्द्रो वज्री हिरण्ययः ॥(5)

▾ ०३ इन्द्रो दीर्घाय

इन्द्रो दीर्घाय चक्षस
आ सूर्यं **रोहयद्** दिवि ।
वि गोभिर् अद्रिम् **ऐरयत्** ॥(5)

▾ ०४ इन्द्र वाजेषु

इन्द्र वाजेषु नो **ऽव**
सहस्र–प्र-धनेषु च ।
उग्र उग्राभिर् ऊतिभिः ॥

▾ ०७ तमिन्द्रं वाजयामसि

तमिन्द्रं **वाजयामसि**
महे वृत्राय **हन्तवे** ।
स वृषा वृषभो **भुवत्** ॥

▾ विश्वास-प्रस्तुतिः

इन्द्रस् स **दामने कृतः** ।
ओजिष्ठस् स बले **हितः** ।
द्युम्नी श्लोकी स सौम्यः ।

▾ सर्वाष् टीकाः

▾ विश्वास-प्रस्तुतिः

गिरा वज्रो न सम्भृतः ।
सबलो अनपच्युतः ।
ववक्षुर् उग्रो अस्तृतः ॥ 35 ॥

▾ सर्वाष् टीकाः

▾

## ④२६ 'चक्षुषो हेते'

'चक्षुषो हेत' इत्यारभ्य 'भ्रातृव्यं पादयामसि' इत्यन्तं

▾ चक्षुषो हेते

⑥मेनिवारणम्

▾ विश्वास-प्रस्तुतिः

चक्षुषो हेते मनसो हेते,
वाचो हेते ब्रह्मणो हेते ।
यो मा ऽघायुर् **अभिदासति**(=अभिचरति),
तम् अग्ने मेन्या(=मन्युना) **ऽमेनिं कृणु** ।

▾ सर्वाष् टीकाः

▾ विश्वास-प्रस्तुतिः

यो मा चक्षुषा यो मनसा,
यो वाचा ब्रह्मणा ऽऽघायुर् **अभिदासति** ।
तयाऽग्ने त्वं मेन्या,
अमुम् **अमेनिं कृणु** ।

▾ सर्वाष् टीकाः

⑥अभिचार-प्रतीकारः

▾ विश्वास-प्रस्तुतिः

यत् किञ्चासौ मनसा यच् च वाचा,
यज्ञैर् **जुहोति** यजुषा हविर्भिः ।
तन् मृत्युर् निर्ऋत्या **संविदानः**(=समाहितः),
पुरा दिष्टाद्(=दैवात् तदनुकूलाद्) आहुतीर् अस्य **हन्तु** ।

▾ सर्वाष् टीकाः

▾ विश्वास-प्रस्तुतिः

यातुधाना निर्ऋतिर् आदु(=अनु) रक्षः,
ते अस्य **घ्नन्त्व्** अनृतेन सत्यम् ।
इन्द्रेषिता आज्यमस्य **मथ्नन्तु**,
मा तत् **समृद्धि** यद् असौ **करोति** ।

▾ सर्वाष् टीकाः

⑥प्रतिज्ञा

▾ विश्वास-प्रस्तुतिः

**हन्मि** तेऽहं कृत३ं हविः,
यो मे घोरम् **अचीकृतः**(=अकार्षीः) ।
**अपाञ्चौ** त उभौ बाहू,
**अपनह्याम्य्** (=बध्नामि) आस्यम् ।

▾ सर्वाष् टीकाः

▾ विश्वास-प्रस्तुतिः

**अपनह्यामि** ते बाहू,
**अपनह्याम्य्** आस्यम् ।
अग्नेर् देवस्य ब्रह्मणा,
सर्वं ते **ऽवधिषं** कृतम् ।

▾ सर्वाष् टीकाः

⑥अभिचार-प्रतीकारः

▾ विश्वास-प्रस्तुतिः

पुरा ऽमुष्य वषट्कारात्,
यज्ञं देवेषु नस् **कृधि** ।
स्विष्टम् अस्माकं **भूयात्**,
माऽस्मान् **प्रापन्न्** अरातयः ।

▾ सर्वाष् टीकाः

▾ विश्वास-प्रस्तुतिः

अन्ति दूरे **सतो** अग्ने,
**भ्रातृव्यस्याऽऽभिदासतः** ।
वषट्कारेण वज्रेण,
कृत्या३ं **हन्मि कृताम्** अहम् ।

▾ सर्वाष् टीकाः

▾ विश्वास-प्रस्तुतिः

यो मा नक्तं दिवा सायम्,
प्रातश् चाह्नो **निपीयति**(=बाधते) ।
अद्या तम् इन्द्रवज्रेण,
भ्रातृव्यं **पादयामसि**(=पातयामि) ।

▾ सर्वाष् टीकाः

▾

## ④२७ 'प्राणो रक्षति'

▾ +०१, उपहोमशेषः - प्राणो रक्षति

▾ 01 प्राणो रख्षति

प्राणो **रख्षति** विश्वम् **एजत्** ।
**इर्यो भूत्वा** बहुधा बहूनि ।
स इथ् सर्वं **व्यानशे**(=व्याप्तवान्) ।

▾ 01 प्राणो रख्षति

▾ 02 यो देवो

यो दे॒वो दे॒वेषु॑ वि॒भूर् अ॒न्तः ।
आ-वृ॑द् **ऊदात्**(←वचने) ख्षेत्रि॒य् अ॑ध्व-गद् वृषा॑ ।
तम् इत् प्रा॒णम् मन॒सोप॑ **शिख्षत** ।
अ॒ग्रं॑न् दे॒वाना॑म् इ॒दम् **अ॑त्तु** नो ह॒विः ।

▾ 02 यो देवो

▾ 03 मनस्श्चित्तेदम्

मन॑सश् चि॒त्ता॑+इ॒दम् ।
भू॒तम् भव्य॑ञ् च **गुप्यते** ।
तद् +हि दे॒वेष्व् अ॑ग्रि॒यम् ॥1॥

▾ 03 मनस्श्चित्तेदम्

▾ 04 आ न

आ न॑ **एतु** पु॒रश् च॒रम् ।
स॒ह दे॒वैर् इ॒मꣳ हवँ॑म्(=आह्वानम्) ।
मन॒श् श्रेय॑सिश्रेयसि ।
कर्म॑न्(→णि) य॒ज्ञ-प॑तिन् **दध॑त्** ।(5)

▾ 04 आ न

▾ 05 जुषताम्मे वागिदम्

**जुषता॑म्** मे॒ वाग् इ॒दꣳ ह॒विः ।
वि॒राड् दे॒वी पु॒रोहि॑ता ।
ह॒व्य॒-वाड् **अन॑पायिनी** ।

▾ 05 जुषताम्मे वागिदम्

▾ 06 यया रूपाणि

यया॑ रू॒पाणि॑ ब॒हुधा **वद॑न्ति** ।
पेशाꣳ॑सि दे॒वाः᳚ प॑र॒मे ज॒नित्रे॑ ।
सा नो॑ वि॒राड् **अन॑पस्फुरन्ती** ॥2॥
वाग्-दे॒वी **जु॑षताम्** इ॒दꣳ ह॒विः ।

▾ 06 यया रूपाणि

▾ 07 चक्षुर्देवानाञ्ज्योतिरमृते

चख्षु॑र् दे॒वाना॒ञ् (→सूर्यः) ज्योति॑र् अ॒मृते॒ **न्यक्त॒म्** ।
अ॒स्य (→सर्वस्य) वि॒ज्ञाना॑य ब॒हुधा **निधी॑यते** ।
तस्य॑ (→चक्षुषोः) सु॒म्नम् **अ॑शीमहि** ।
मा नो॑ **हासीद्** विचख्ष॒णम् ।

▾ 07 चक्षुर्देवानाञ्ज्योतिरमृते

▾ 08 आयुरिन्न᳚ प्रतीर्यताम्

आयु॒र् इन् न᳚ः **प्रती॑र्यताम्** ।
अन॑न्धाश् चख्षु॒षा व॒यम् ।
जी॒वा ज्योति॑र् **अशीमहि** ।
सुव॒र् ज्योति॑र् उ॒तामृत॑म् ।

▾ 08 आयुरिन्न᳚ प्रतीर्यताम्

▾ 09 श्रोत्रेण भद्रमुत

श्रोत्रे॑ण भ॒द्रम् उ॒त **शृ॒ण्वन्ति** स॒त्यम् ।
श्रोत्रे॑ण वाच॑म् **बहुधोद्यमा॑नाम्** ।
श्रोत्रे॑ण मोद॑श् च॒ मह॑श् च **श्रूयते** ।
श्रोत्रे॑ण सर्वा॒ दिश॒ आ **शृ॑णोमि** ।

▾ 09 श्रोत्रेण भद्रमुत

▾ 10 येन प्राच्या

येन॒ प्राच्या॑ उ॒त द॑ख्षि॒णा । प्र॒तीच्यै॑ दि॒शश् **शृ॒ण्वन्त्य्** उ॑त्त॒रात् ।
तद् इ॒च् छ्रोत्र॑म् **बहुधोद्यमा॑नम्** ।
अ॒रान् न ने॒मिः᳚ परि॒ सर्व॑म् **बभूव** ॥3॥(5)

▾ 10 येन प्राच्या

▾

## ④२८ 'सिंहे व्याघ्रे'

▾ ०७, ओदन-सवः - सिंहे व्याघ्रे

▾ विश्वास-प्रस्तुतिः

सि॒ꣳहे व्या॒घ्र उ॒त या पृदा॑कौ(=अजगरे) ।
**त्विषि॑र्** अ॒ग्नौ ब्रा॑ह्म॒णे सूर्ये॑ या ।
इन्द्रँ॒ या **दे॒वी** सु॒भगा॑ **ज॒जान॑** ।
सा न॒ **आग॒न्** वर्च॑सा **सवँ॑ विदा॒ना** ।

▾ सर्वाप् टीकाः

▾ विश्वास-प्रस्तुतिः

या रा॑ज॒न्ये॑, दु॒न्दु॒भाव् आय॑तायाम् ।
अश्व॑स्य॒ क्रन्द्ये॑, पुरु॑षस्य मा॒यौ ।
इन्द्रँ॒ या दे॒वी सु॒भगा॑ **ज॒जान॑** ।
सा न॒ **आग॒न्** वर्च॑सा **सवँ॑ विदा॒ना** ।

▾ सर्वाप् टीकाः

▾ विश्वास-प्रस्तुतिः

या ह॒स्तिनि॑ द्वी॒पिनि॒ या हि॑र॒ण्ये ।
**त्विषि॑र्** अ॒श्वे॑षु॒ पुरु॑षेषु॒ गोषु॑ ॥16॥
इन्द्रँ॒ या **दे॒वी** सु॒भगा॑ **ज॒जान॑** ।
सा न॒ **आग॒न्** वर्च॑सा **सवँ॑ विदा॒ना** ।

▾ सर्वाप् टीकाः

▾ विश्वास-प्रस्तुतिः

रथे॑, अ॒ख्षेषु॑, वृ॒ष॒भस्य॒ वाजे॑ ।
वाते॑, प॒र्जन्ये॑, वरु॑णस्य॒ शुष्मे॑ ।
इन्द्रँ॒ या दे॒वी सु॒भगा॑ **ज॒जान॑** ।
सा न॒ **आग॒न्** वर्च॑सा **सवँ॑ विदा॒ना** ।

▾ सर्वाप् टीकाः

▾ विश्वास-प्रस्तुतिः

(हे आज्यमन्थ!) रा॒ड् अ॑सि। वि॒राड् अ॑सि ।

▾ विश्वास-प्रस्तुतिः

स॒म्राड् अ॑सि। स्व-राड् अ॑सि ।

▾ विश्वास-प्रस्तुतिः

इन्द्रा॑य त्वा॒ तेज॑स्वते॒ तेज॑स्वन्तꣳ **श्रीणामि** ।

▾ विश्वास-प्रस्तुतिः

इन्द्रा॑य त्वौज॑स्वत॒ ओज॑स्वन्तꣳ **श्रीणामि** ॥17॥

▾ विश्वास-प्रस्तुतिः

इन्द्रा॑य त्वा॒ पय॑स्वते॒ पय॑स्वन्तꣳ **श्रीणामि** ।

▾ विश्वास-प्रस्तुतिः

इन्द्रा॑य त्वाऽऽयु॑ष्मत॒ आयु॑ष्मन्तꣳ **श्रीणामि** ।

▾ विश्वास-प्रस्तुतिः

(आज्यमन्थ!) तेजो॑ ऽसि । (यजमान!) तत् ते॒ प्रय॑च्छामि ।

▾ विश्वास-प्रस्तुतिः

तेज॑स्वद् **अस्तु** मे॒ मुखँ॑म् ।
तेज॑स्वच् छिरो॑ **अस्तु** मे ।
तेज॑स्वान् वि॒श्वत॑ः᳚ प्र॒त्यङ्ङ् ।
तेज॑सा॒ **सम्पि॑पृग्धि** मा ।

▾ सर्वाप् टीकाः

▾ विश्वास-प्रस्तुतिः

ओजो॑ऽसि । तत्ते॒ प्रय॑च्छामि ॥18॥

▾ विश्वास-प्रस्तुतिः

ओज॑स्वद् **अस्तु** मे॒ मुखँ॑म् । ओज॑स्वच् छिरो॑ **अस्तु** मे ।
ओज॑स्वान् वि॒श्वत॑ः᳚ प्र॒त्यङ्ङ् । ओज॑सा॒ **सम्पि॑पृग्धि** मा ।

▾ सर्वाप् टीकाः

▾ विश्वास-प्रस्तुतिः

पयो॑ऽसि । तत्ते॒ प्रय॑च्छामि ।

▾ विश्वास-प्रस्तुतिः

पय॑स्वद् **अस्तु** मे॒ मुखँ॑म् ।
पय॑स्वच्छिरो॑ **अस्तु** मे ।
पय॑स्वान् वि॒श्वत॑ः᳚ प्र॒त्यङ्ङ् ।
पय॑सा॒ **सम्पि॑पृग्धि** मा ॥19॥

▾ सर्वाप् टीकाः

▾ विश्वास-प्रस्तुतिः

आयु॑रसि । तत्ते॒ प्रय॑च्छामि ।

▾ विश्वास-प्रस्तुतिः

आयु॑ष्मद् **अस्तु** मे॒ मुखम॑ ।
आयु॑ष्मच् छिरो॑ **अस्तु** मे ।
आयु॑ष्मान् वि॒श्वत॑ः᳚ प्र॒त्यङ्ङ् ।
आयु॑षा॒ **सम्पि॑पृग्धि** मा ।

▾ सर्वाप् टीकाः

▾ विश्वास-प्रस्तुतिः

इ॒मम् अ॑ग्न आ॒युषे॒ वर्च॑से **कृधि** ।
प्रि॒यꣳ रेतो॑ वरुण सोम राजन् ।
मा॒तेवा॑स्मा अदिते॒ शर्म॑ **यच्छ** ।
विश्वे॑ देवा॒ जर॑-दष्टि॒र् यथा **ऽस॑त्** ॥20॥

▾ सर्वाप् टीकाः

▾ विश्वास-प्रस्तुतिः

आयु॑र् **असि**।
वि॒श्वायु॑र् **असि** । स॒र्वायु॑र् **असि॒**, सर्व॒म् आयु॑र् **असि** ।

▾ विश्वास-प्रस्तुतिः

यतो॒ वातो॒ मनो॑जवाः ।
य॒तः **ख्षर॑न्ति** सिन्ध॑वः ।
तासा॑न् त्वा॒ सर्वा॑साꣳ रु॒चा ।

**अभिषिञ्चामि** वर्चसा ।

▾ सर्वाप् टीका:
▾ विश्वास-प्रस्तुतिः

समुद्र **इवासि** गह्मना ।
सोम इवास्य् **अदाभ्यः** ।
अग्निर् इव विश्वतः प्रत्यङ्ङ् ।
सूर्य इव ज्योतिषा विभूः ॥21॥(5)

▾ सर्वाप् टीका:
▾ विश्वास-प्रस्तुतिः

अपायँ यो द्रवणे रसः ।
तम् अहम् अस्मा आमुष्यायणाय (→पुत्राय)
तेजसे ब्रह्मवर्चसाय **गृह्णामि** ।

▾ विश्वास-प्रस्तुतिः

अपायँ य ऊर्मौ रसः ।
तम् अहम् अस्मा आमुष्यायणाय
ओजसे वीर्याय **गृह्णामि** ।

▾ विश्वास-प्रस्तुतिः

अपायँ यो मध्यतो रसः ।
तम् अहम् अस्मा आमुष्यायणाय
पुष्ट्यै प्रजननाय **गृह्णामि** ।

▾ विश्वास-प्रस्तुतिः

अपायँ यो यज्ञियो रसः ।
तम् अहम् अस्मा आमुष्यायणाय
+आयुषे दीर्घायुत्वाय गृह्णामि ॥22॥

▾

④२९ 'अहमस्मि',

▾ ०८, वेहदादिपञ्चानां सूक्तानि

⑥अन्नम्

▾ ८ ०१ अहमस्मि प्रथमजा
▾ विश्वास-प्रस्तुतिः

अहम् **अस्मि** प्रथमजा (=प्रथमजनयिता) ऋतस्य (=यज्ञस्य) ।
पूर्वं देवेभ्यो अमृतस्य नाभिः ।
यो मा **ददाति**, स इद् एव मा (अन्नरूपं) ऽऽवाः (=आवृणोति [पश्चात्])।
अहम् (दात्रे) अन्नम्, (अदत्वा) अन्नम् अदन्तम् **अद्मि**।

▾ सर्वाप् टीका:
▾ विश्वास-प्रस्तुतिः

पूर्वम् (मरण/नरक-)अग्नेर् अपि **दहत्य्** अन्नम् (अदातारम्)।
यत् तौ (→ऽदाता, दाता च) हा ऽऽसते, अहम्(←स्वरः??) उत्तरेषु ।
व्यात्तम् अस्य (=अन्न-देवस्य) पशवस् (=ये ऽदातारस् तान्प्रति) सुजम्भम् ।
**पश्यन्ति** धीरा (→दातारः), **प्रचरन्ति** पाकाः (=मूढा [अदातारः]) ।

▾ सर्वाप् टीका:
▾ विश्वास-प्रस्तुतिः

**जहाम्य्** अन्यन्, **न जहाम्य्** अन्यम् ।
अहम् अन्नं, (उक्त-नियम-)वशम् इच् **चरामि** ।
(दात्रदात्रोः) समानम् अर्थं (→नियमं) **पर्येमि** (केवलम्) - "भुञ्जत् (=पालयन्) ।
को माम् अन्नं मनुष्यो **दयेत**?"।

▾ सर्वाप् टीका:
▾ विश्वास-प्रस्तुतिः

पराके (→लोके) अन्नं **निहितं** लोक एतत् ।
विश्वैर् देवैः पितृभिर् **गुप्तम्** अन्नम् ।
यद् **अद्यते लुप्यते**, यत् **परोप्यते** (=बहिस्त्यज्यते) (अस्मिँ लोके) ।
शततमी (=.०१), **सा तनूर्** मे बभूव (पर-लोके) ।

▾ सर्वाप् टीका:
▾ विश्वास-प्रस्तुतिः

महान्तौ चरू (=कुम्भौ) सकृद् दुग्धेन **पप्रौ**(←पूरणे) ।
दिवं च **पृश्नि** (=स्वल्पम् [अपि]) पृथिवीं च साकम् ।
तत् **संपिबन्तो न मिनन्ति** (=हिंसन्ति आत्मनः) वेधसः ।
नैतद् भूयो **भवति**, नो कनीयः (अपि च पर्याप्तः) ।

▾ सर्वाप् टीका:
▾ विश्वास-प्रस्तुतिः

अन्नं प्राणम्, अन्नम् अपानम् **आहुः** ।
अन्नं मृत्युं तम् उ जीवातुम् (=जीवनौषधिम्) **आहुः** ।
अन्नम् ब्रह्माणो जरसं **वदन्ति** ।
अन्नम् **आहुः** प्रजननम् प्रजानाम् ।

▾ सर्वाप् टीका:
▾ विश्वास-प्रस्तुतिः

मोघम् अन्नं **विन्दते** अ-प्र-चेताः (अदातृत्वेन लक्षितः) ।
सत्यम् **ब्रवीमि** वध इत्स तस्य ।
नार्यमणम् **पुष्यति** नो सखायम् ।
केवलाघो **भवति** केवलादी ।

▾ सर्वाप् टीका:
▾ विश्वास-प्रस्तुतिः

अहम् मेघस् स्तनयन् **वर्षन्न् अस्मि** ।
माम् **अदन्त्य्**, अहम् **अद्म्य्** अन्यान् ॥ 61 ॥
अहꣳ सद् अमृतो **भवामि** ।
मद् आदित्या अधि सर्वे **तपन्ति** ।

▾ सर्वाप् टीका:

⑥वाक्

▾ ०१-१४ देवीं वाचम्
▾ ११ देवीं वाचमजनयन्त

देवीं वाचम् **अजनयन्त** देवास्
तां विश्वरूपाः पशवो **वदन्ति** ।
सा नो मन्द्रेषम् ऊर्जं **दुहाना**
धेनुर् वाग् अस्मान् **उपसुष्टुतैतु** ।

▾ 011

▾ १० यद्वाग्वदन्त्यविचेतनानि राष्ट्री

यद् वाग् वदन्त्य् अविचेतनानि
राष्ट्री देवानां निषसाद मन्द्रा (अस्मत्कर्मणि)।
चतस्र (दिग्देवताः) ऊर्जं दुदुहे पयाँसि
क्वस्विद् अस्याः परमं जगाम ।

▾ 010
▾ विश्वास-प्रस्तुतिः

अनन्ताम् अन्ताद् अधि **निर्मितां** महीयँ
यस्यां देवा **अदधुर्** भोजनानि (होममन्त्रैरश्नन्ति)।
एकाक्षरां द्विपदाँ षट्पदां च
वाचं देवा **उपजीवन्ति** विश्वे ।

▾ सर्वाप् टीका:
▾ विश्वास-प्रस्तुतिः

वाचं देवा **उपजीवन्ति** विश्वे
वाचं गन्धर्वाः पशवो मनुष्याः ।
वाचीमा विश्वा भुवनान्य् **अर्पिता**
सा नो हवं **जुषताम्** इन्द्रपत्नी (बहुव्रीहेर् ङीप्) ।

▾ सर्वाप् टीका:
▾ विश्वास-प्रस्तुतिः

वाग् अक्षरं प्रथमजा ऋतस्य
वेदानां माता ऽमृतस्य नाभिः ।
सा नो **जुषाणोप** यज्ञम् **आगाद्**
**अवन्ती** देवी सुहवा मे **अस्तु** ।

▾ सर्वाप् टीका:
▾ विश्वास-प्रस्तुतिः

याम् ऋषयो मन्त्रकृतो मनीषिणः+
**+अन्वैच्छन्** देवास् तपसा श्रमेण ।
तां देवीं वाचँ हविषा **यजामहे**
सा नो **दधातु** सुकृतस्य लोके ।

▾ सर्वाप् टीका:
▾ ४५ चत्वारि वाक्परिमिता

चत्वारि वाक् परिमिता पदानि
तानि **विदुर्** ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि (=परा-पश्यन्ती-मध्यमाः) **निहिता** नेङ्गयन्ति
तुरीयं वाचो (=वैखरी) मनुष्या **वदन्ति** ॥

▾ 045

⑥श्रद्धा

▾ ८ १५-२० श्रद्धया
▾ विश्वास-प्रस्तुतिः

श्रद्धयाऽग्निस्समिध्यते ।
श्रद्धया विन्दते हविः ।
श्रद्धाम्भगस्य मूर्धनि ।
वचसा वेदयामसि ।

▾ 001
▾ ०२ प्रियं श्रद्धे

प्रियं श्रद्धे **ददतः**
प्रियं श्रद्धे **दिदासतः** ।
प्रियं भोजेषु यज्वस्व्

इ॒दं म॑ **उदि॒तं कृ॑धि** ॥

▼ 002

▼ ०३ यथा देवा

यथा॑ दे॒वा अ॒सु॑रेषु
श्र॒द्धाम् उ॒ग्रेषु॑ **च॒क्रि॒रे** ।
ए॒वं भो॒जेषु॒ यज्व॑स्व्
अ॒स्माक॑म् **उदि॒तं कृ॑धि** ॥

▼ 003

▼ ०४ श्रद्धां देवा

श्र॒द्धां दे॒वा यज॑माना
वा॒यु॒गो॑पा॒ **उपा॑सते** ।
श्र॒द्धां हृ॑द॒य्य१॒॑या ऽऽकू॑त्या(=संकल्पक्रियया [उपासते]),
श्र॒द्धया॑ **विन्दते॒** व॒सु॑ ॥

▼ 004

▼ ०५ श्रद्धां प्रातर्हवामहे

श्र॒द्धां प्रा॒तर् **ह॑वामहे**
श्र॒द्धां म॒ध्यन्दि॑नं॒ **परि॑** ।
श्र॒द्धां सूर्य॑स्य नि॒म्रुचि॒(=निमज्जने)
श्रद्धे॒ **श्र॒द्धा॑पये॒ह** न॑ः ॥

▼ 005

▼ विश्वास-प्रस्तुतिः

श्र॒द्धा दे॒वानधि॑ **वस्ते** ।
श्र॒द्धा विश्व॑म् इ॒दञ् जग॑त् ।
श्र॒द्धाङ् काम॑स्य मा॒तर॒॑म् ।
ह॒विषा॑ **वर्धयामसि** ।

▼ सर्वाष् टीकाः

⑥ब्रह्म

▼ ८ २१-२६ ब्रह्म जज्ञानम्

▼ विश्वास-प्रस्तुतिः

ब्रह्म॑ (=मन्त्रः ([सौरमण्डलयज्ञे])) ज॒ज्ञा॒नं (=उत्पन्नम्) प्र॑थ॒मं पु॒रस्ता॑द्
वि सी॑म॒तस् सु॒रुचो॑ वे॒न **आ॑वः** ।
स बु॒ध्न्या॑ (=मूले भवः ([खस्य सूर्यः])) उ॒प॒मा अ॑स्य **वि॒ष्ठाः** (=विस्थितः),
स॒तश्च॒ योनि॒म् (सूर्यम्) अस॑तश्च॒ **विवः॑** (=विवृतवान्) ।

▼ विश्वास-प्रस्तुतिः

पि॒ता वि॒राजा॑म्, ऋ॒ष॒भो र॑यी॒णाम् ।
अ॒न्तरि॑क्ष॒वँ वि॒श्व-रू॑प॒ **आवि॑वेश** ।
तम् अ॒र्कैर् **अ॒भ्य॑र्चन्ति** व॒थ्सम् ।
ब्रह्म॒ स॒न्त॒म् ब्रह्म॑णा **व॒र्धय॑न्तः** ।

▼ सर्वाष् टीकाः

▼ विश्वास-प्रस्तुतिः

ब्रह्म॑ दे॒वान् **अ॑जनयत्** ।
ब्रह्म॒ विश्व॑म् इ॒दञ् जग॑त् ।
ब्रह्म॑णः ख्ष॒त्रन् **निर्मि॑तम्** ।
ब्रह्म॑ ब्रा॒ह्म॒ण आ॒त्मना॒॑ ।

▼ सर्वाष् टीकाः

▼ विश्वास-प्रस्तुतिः

अ॒न्तर् अ॑स्मिन्न् इ॒मे लो॒काः ॥ 67 ॥
अ॒न्तर् विश्व॑म् इ॒दञ् जग॑त् ।
ब्र॒ह्मै॒व भू॒ताना॒ञ् ज्येष्ठ॒॑म् ।
ते॒न॒ को॑ **ऽर्हति॒** स्पर्धि॑तुम् ।

▼ सर्वाष् टीकाः

▼ विश्वास-प्रस्तुतिः

ब्रह्म॑न् दे॒वास् त्रय॑स्-त्रि॒ꣳशत् ।
ब्रह्म॑न्न् इन्द्र-प्रजा॒पती ।
ब्रह्म॑न् ह॒ विश्वा॑ भू॒तानि॑ ।
ना॒वीवा॒न्तस् **स॒माहि॑ता** ।

▼ सर्वाष् टीकाः

▼ विश्वास-प्रस्तुतिः

चत॑स्र॒ आशा॒ऽऽ प्रच॑रन्त्व॒ग्नयः॑ ।
इ॒मन्नो॑ य॒ज्ञन्न॑यतु प्रजा॒नन्न् ।
घृ॒तम्पिन्व॑न्न॒जरꣳ॑ सु॒वीर॒॑म् ॥ 68 ॥
ब्रह्म॑ स॒मिद्भ॑वत्याहु॑तीनाम् ।

▼ सर्वाष् टीकाः

⑥गौः

▼ ८ २७-३३ आ गावो अग्मन्

▼ ०१ आ गावो

आ गावो॑ **अग्मन्न्** उ॒त भ॒द्रम् **अ॑क्रन्त्**
**सीद॑न्तु** गो॒ष्ठे **र॒णय॑न्त्व्** अ॒स्मे ।
प्र॒जाव॑तीऽऽ पु॒रु॒रूपा॑ इ॒ह *स्युर्
इन्द्रा॑य पू॒र्वीर् उ॒षसो॒ **दुहा॑नाः** ।

▼ 001

▼ ०२ इन्द्रो यज्वने

इन्द्रो॒ **यज्व॑ने** (हविः) **पृ॒ण॒ते च॑ शिक्ष॒त्य्**,
उपे॑द् **दद॑ाति**, न स्वं **मु॑षायति** ।
भूयो॑भूयो र॒यिम् इद् अ॑स्य **व॒र्धय॒न्न्**
अभि॑न्ने ख़ि॒ल्ये (स्वर्गे) **नि द॑धाति** दे॒व॒युम्(=देवकामम्) ॥

▼ 002

▼ विश्वास-प्रस्तुतिः

**न** ता (गाः) **न॑शन्ति॒**(←नश् ), **न द॑भाति** तस्क॑र॒ः।
नैना॑ अ॒मि॒त्रो व्य॒थि॒र्(←व्यथ्) **आद॑धर्षति** ।
दे॒वाँश् च॒ याभि॒र् **यज॑ते॒ ददा॑ति** च॒
ज्योग् इत् ताभि॑ः (उभय-लोकयोः) **सचते॒**(←समवाये) गोप॑तिः स॒ह ॥

▼ सर्वाष् टीकाः

▼ ०४ न ता

**न** ता (गाः) अर्वा॑(=अश्वः) रे॒णु-क॑काटो(=उत्थापकः) **अश्नुते॒** (स्वाभाविक-वेगात्)
**न** स॑स्कृ॒त-त्रम् (यष्टि-मन्तम्) **उप॑ यन्ति॒** ता अ॒भि ।
उ॒रु॒गा॒यम् अभ॑यं॒ (स्थानं) तस्य॒ ता अनु॒
गावो॒ मर्त॑स्य॒ **वि च॑रन्ति॒** यज्व॑नः ॥

▼ 004

▼ विश्वास-प्रस्तुतिः

गावो॒ भगो॒, गाव॒ इन्द्रो॑ मे अच्छा॒त् ।
गाव॒स् सोम॑स्य प्र॒थ॒मस्य॑ भ॒ख्षः ।
इ॒मा या गाव॒स्, स जना॑स॒ इन्द्र॑ः ।
**इ॒च्छामीद्** +हृ॒दा मन॑सा चि॒दिन्द्र॒॑म् ।

▼ सर्वाष् टीकाः

▼ ०६ यूयं गावो

यू॒यं गा॑वो! **मेदयथा** कृ॒शं चि॑द् (स्वामिनम्),
अ-श्री॒रं॑(=श्लीलं) चि॑त् **कृणुथा** सु॒-प्रती॑कम् (अङ्ग-पुष्ट्या)।
भ॒द्रं गृ॒हं **कृ॑णुथ** भद्र-वाचो
बृ॒हद् वो॒ वय॑(=अन्नं) **उच्यते** स॒भासु॑ ॥

▼ 006

▼ विश्वास-प्रस्तुतिः

प्र॒जाव॑तीः (गाः), सू॒-यव॑सं (भक्षणेन) **रि॒शन्तीः॑**।
शु॒द्धा अ॒पः सु॑-प्रपा॒णे **पिब॑न्तीः** ।
**मा** व॑ः स्ते॒न **ईश॒त** माघश॑स॒ः।
**परि॑** वो हे॒ती रु॒द्रस्य॑ **वृ॒ज्यात्** ।

▼ सर्वाष् टीकाः

▼ विश्वास-प्रस्तुतिः

उपे॒दम् उ॑प॒पर्च॑नम् (तृणादिकं)।
आ॒सु गो॒षूप॑-**पृच्यताम्** ।
उप॑-र्ष॒भस्य॒ रेत॑सि ।
उपे॒॑न्द्र॒ तव॑ वी॒र्ये॒॑ ॥ 70 ॥

▼ सर्वाष् टीकाः

▼

④३० ‘ता सूर्या चन्द्रमसा’,

▼ ०९, शुक्लकृष्णपश्वादीनां सूक्तानि

⑥सूर्याचन्द्रमसौ

▼ ९ ०१-०६ ता सूर्याचन्द्रमसा

▼ विश्वास-प्रस्तुतिः

ता सू॒॑र्याचन्द्र॒मसा॑ वि॒श्व-भृत्त॑मा म॒हत् ।
तेजो॒ व॒सु॑मद् **राजतो** दि॒वि ।
सामा॒॑त्माना **चरतस्** साम-चा॒रिणा॒॑ (न भेद-चारिणौ) ।
यया॒॑र् व्र॒तन् न **म॒मे** जातु॑ दे॒वयो॒॑ः ।

▼ सर्वाष् टीकाः

▼ विश्वास-प्रस्तुतिः

उ॒भाव् अ॒न्तौ॒ **परि॑ यात॒** अम्र्या॒॑(=गत्या) ।
दि॒वो न र॒श्मीꣳस् **त॑नुतो व्य्** अ॑र्ण॒वे ।
उ॒भा **भु॑व॒न्ती** भुव॑ना क॒वि-क्र॑तू ।
सूर्या॒ न च॒न्द्रा **च॑रतो** ह॒ता-म॑ती ।

▼ सर्वाष् टीकाः

▼ विश्वास-प्रस्तुतिः

पतीं द्युमद् विश्व-विदा उभा दिवः ।
सूर्या उभा चन्द्रमसा विचख्षणा ॥ 71 ॥
विश्व-वारा **वरिवा**(=पूजितौ) +उभा वरेण्या ।
ता नो **ऽवतम्** मतिमन्ता महिव्रता ।

▾ सर्वाणि टीकाः
▾ विश्वास-प्रस्तुतिः

विश्व-वपरी(←वप्) प्रतरणा **तरन्ता** ।
सुवर्-विदा दृशये भूरि-रश्मी ।
सूर्या हि चन्द्रा वसु त्वेष-दर्शता ।
मनस्विनोभा **ऽनुचरतो** नु सन् दिवम् ।

▾ सर्वाणि टीकाः
▾ ०२ अस्य श्रवो

अस्य (→तवेन्द्रस्य) श्रवो नद्यः सप्त **बिभ्रति**
द्यावाक्षामा पृथिवी दर्शतं(=दर्शनीयं) वपुः ।
अस्मे(=अस्मभ्यं) सूर्याचन्द्रमसा **ऽभिचक्षे**(=कथयसि)
श्रद्धे(=श्रद्धया) कम्(=सुखम्) इन्द्र **चरतो** वि-तर्तुरम्(=त्वरया) ॥

▾ 002
▾ विश्वास-प्रस्तुतिः

पूर्वापरञ् **चरतो** माययैतौ ।
शिशू **क्रीडन्तौ** परि यातो अ-ध्वरम्(=अ-हिंसम् →यज्ञम्) ।
विश्वान्य् (तयोर्) अन्यो भुवना **ऽभि चष्टे** ।
ऋतून् अन्यो **विदधज् जायते** पुनः ।(5)

▾ सर्वाणि टीकाः
⑥पावमान्यः - अद्भ्यो वेहतम्

▾ विश्वास-प्रस्तुतिः

हिरण्यवर्णाश् शुचयः पावका,
यासु **जातः** कश्यपो, यास्व् इन्द्रः ।
अग्निं या गर्भन् **दधिरे**, विरूपास् -
ता न आपश् शꣳ स्योना **भवन्तु** ।

▾ विश्वास-प्रस्तुतिः
▾ विश्वास-प्रस्तुतिः

यासाꣳ राजा वरुणो **याति** मध्ये,
सत्यानृते **अवपश्यञ्** जनानाम् ।
मधुश्-**चुतश्** शुचयो याः पावकास् -
ता न आपश् शꣳ स्योना **भवन्तु** ।

▾ विश्वास-प्रस्तुतिः
▾ विश्वास-प्रस्तुतिः

यासां देवा दिवि **कृण्वन्ति** भख्षं -
या अन्तरिख्षे बहुधा **भवन्ति** ।
याः पृथिवीम् **पयसोन्दन्ति** शुक्रास् -
ता न आपश् शꣳ स्योना **भवन्तु** ।

▾ विश्वास-प्रस्तुतिः
▾ विश्वास-प्रस्तुतिः

शिवेन मा चख्षुषा **पश्यतापश्** -
शिवया तनुवोप **स्पृशत** त्वचम् मे ।
सर्वाꣳ अग्नीꣳर् अप्सु-षदो **हुवे** वो,
मयि वर्चो बलम् ओजो **नि धत्त** ।

▾ विश्वास-प्रस्तुतिः
⑥आपः

▾ विश्वास-प्रस्तुतिः

आपो भद्रा, घृतम् इद् आप आसुर् -
अग्नीषोमौ **बिभ्रत्य्**, आप इत् ताः ।
तीव्रो रसो मधु-पृचाम् अरङ्-गम (→रसः)
**आ** मा प्राणेन सह वर्चसा **गन्** ।

▾ सर्वाणि टीकाः
▾ विश्वास-प्रस्तुतिः

आद्(=अतः) इत् **पश्याम्य्** उत वा **शृणोम्य्**
आ मा घोषो **गच्छति** वाङ् न आसाम् ।
**मन्ये** भेजानो(←भज्) अमृतस्य तर्हि
हिरण्य-वर्णा **अतृपं** यदा वः ।

▾ सर्वाणि टीकाः
▾ ०१ आपो हि

आपो हि ष्ठा मयोभुवस्
ता न ऊर्जे(जाः) दधातन ।
महे रणाय(=रमणीयाय) चक्षसे(=दर्शनाय) ॥

▾ 001
⑥नासदीयम्

▾ १ ०८-१६ नासदीयम्
▾ १२९
▾ सर्वाणि टीकाः
⑥01 नासदासीन्नो सदासीत्तदानीम् - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

नासद् आसीन्, नो सदासीत् तदानीम् । नासीद् रजो, नो व्योमा परो यत् ।
किम् आवरिवः(=आवरणीयं)? कुह(=क्व)? कस्य शर्मन्(णे)? अम्भः किम् आसीद् गहनं गभीरम् ?

⑥02 न मृत्युरासीदमृतम् - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

न मृत्युर्, अमृतं तर्हि न । रात्र्या अह्न आसीत् प्रकेतः(=सङ्केतः [ज्योतींषि]) ।
आनीद् (=अचेष्टयत्) अवातꣳ (स्वयमाश्रयेण) स्वधया तद् एकम् (ब्रह्म)। तस्माद् +हाऽन्यं न परः किञ्चनास ।

⑥03 तम आसीत्तमसा - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

तम (ब्रह्म) आसीत्, तमसा गूढम् अग्रे प्रकेतम् (=रहस्यम्)। (यथा) सलिलꣳ सर्वम् आ इदम् ।
तुच्छेनाभ्व् अपिहितं यद् आसीत् । तमसस् तन्-महिना जायतैकम् (जगत्)।

⑥04 कामस्तदग्रे समवर्तताधि - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

कामस् तद् अग्रे समवर्तताधि (=आधिक्ये)। मनसो रेतः प्रथमं यद् आसीत् ।
सतो बन्धुम् असति निरविन्दन् । हृदि प्रतीष्या कवयो मनीषा (=बुद्ध्या)।

⑥05 तिरश्चीनो विततो - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

तिरश्चीनो विततो रश्मिर् एषाम् । अधस्विद् आसी३द्; उपरिस्विद् आसी३त् ।
रेतोधा(=बीजानि) आसन्, महिमान (पर्वतादयः) आसन् ।
स्वधा (शक्तिः [माया]) अवस्तात्(=अधस्तात्), प्रयतिः(प्रयत्नः) पुरस्तात् ।

⑥06 को अद्धा - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

को अद्धा वेद क इह प्रवोचत् । कुत आ जाता कुत इयं विसृष्टिः ।
अर्वाग् देवा अस्य विसर्जनाय । अथा को वेद यत आ बभूव ।

⑥07 इयं विसृष्टिर्यत - त्रिष्टुप्

▾ विश्वास-प्रस्तुतिः

इयं विसृष्टिर् यत आबभूव । यदि वा (स्वरूपं) दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन् - सो अङ्ग वेद यदि वा न वेद ।

▾ ०८ किं स्विद्वनं

किं स्विद्वनं क उ स वृक्ष **आस्**(आसीत् इति तैत्तिरीयपाठः) -
यतो द्यावापृथिवी **निष्टतक्षुः**(←तक्ष्) ।
मनीषिणो मनसा **पृच्छतेद्** उ तद् -
यद् **अध्यतिष्ठद्** भुवनानि **धारयन्** ।

▾ 004
▾ विश्वास-प्रस्तुतिः

ब्रह्म वनम् ब्रह्म स वृक्ष **आसीत्** ॥ 76 ॥
यतो द्यावापृथिवी **निष्टतख्षुः**(←तक्ष्) ।
मनीषिणो मनसा **विब्रवीमि** वः ।
**ब्रह्माध्यतिष्ठद्** भुवनानि **धारयन्** ।

▾ सर्वाणि टीकाः
⑥भाग्य-सूक्तम् - प्रातर् अग्निम्

▾ १ ३१७ प्रातर् अग्निम्
▾ ०१ प्रातरग्निम् प्रातरिन्द्रम्
▾ ०१ प्रातरग्निं प्रातरिन्द्रं

प्रातर् अग्निं, प्रातर् इन्द्रं **हवामहे**
प्रातर् मित्रावरुणा, प्रातर् अश्विना ।
प्रातर् भगं, पूषणं, ब्रह्मणस्पतिं
प्रातः सोमम्, उत रुद्रं **हुवेम** ॥१॥

▾ ०१ प्रातरग्निम् प्रातरिन्द्रम्
▾ 001
▾ ०२ प्रातर्जितम् भगमुग्रम्
▾ ०२ प्रातर्जितं भगमुग्रं

प्रातर्-जितं (=जयशीलं) भगम् उग्रं **हुवेम**
वयं पुत्रम् अदितेर् यो विधर्ता।
आध्रश् (=दरिद्रश्) चिद् यं मन्यमानस् तुरश्(=त्वरमाणो)-चिद्
राजा चिद् यं **भगं भक्षी**(=भजामी) **त्याह** ॥२॥

▾ ०२ प्रातर्जितम् भगमुग्रम्
▾ 002
▾ ०३ भग प्रणेतर्भग
▾ ०३ भग प्रणेतर्भग

भग प्रणेतर्, भग सत्यराधो!
भगेमां धियम् **उदवा** (=रक्ष) ददन् नः ।
भग प्र णो **जनय** गोभिर् अश्वैर्
भग प्र नृभिर् **नृवन्तः स्याम** ॥३॥

▾ ०३ भग प्रणेतर्भग
▾ 003
▾ ०४ उतेदानीम् भगवन्तस्स्यामोत
▾ ०४ उतेदानीं भगवन्तः

उतेदानीं **भगवन्तः स्याम**+
+उत प्रपित्व (=सायङ्काले) उत मध्ये अह्नाम् ।
उतोदिता मघ-वन्त्! सूर्यस्य
वयं देवानां **सुमतौ स्याम** ॥४॥

▾ ०४ उतेदानीम् भगवन्तस्स्यामोत
▾ 004
▾ ०५ भग एव

भग एव भग-वाँ अस्तु देवास्
तेन वयं **भगवन्तः स्याम** ।
तं त्वा भग सर्व इज् **जोहवीमि** (←जोहवीतीति शाकले)
स नो भग **पुर एता भवेह** ॥५॥

▾ ०५ भग एव
▾ 005
▾ ०६ समध्वरायोषसो नमन्त
▾ ०६ समध्वरायोषसो नमन्त

सम् अध्वरायोषसो **नमन्त**,
दधिक्रावेव (=pegasus-अश्व इव खे) शुचये पदाय (प्रोष्ठ-पदरूपेण खे, आधाने ऽश्वक्रमवद् भुवि)।

(खचक्रे विपरीतदिशि स्वनक्षत्रय् उत्तर-फाल्गुने वर्तित्वाद्)

अर्वाचीनं वसु-विदं (=धनलब्धारं) भगं नो
रथम् इवाश्वा वाजिन **आ वहन्तु** ॥६॥

(३००० BCE इति काले फाल्गुनीषु प्रोष्ठपदासु च सौरायनवर्तनम् अदृश्यतेति प्रासङ्गिकं स्यात्।)

▾ ०६ समध्वरायोषसो नमन्त
▾ 006
▾ ०७ अश्वावतीर्गोमतीर्न उषासो
▾ ०७ अश्वावतीर्गोमतीर्न उषासो

अश्वावतीर् गोमतीर् न उषासो
वीरवतीस् **सदम् उच्छन्तु** (=प्रभातं कुर्वन्तु) भद्राः ।
घृतं दुहाना विश्वतः प्रपीना (=आप्यायन्त्यः)
**यूयं पात** स्वस्तिभिस् सदा नः ॥७॥

▾ ०७ अश्वावतीर्गोमतीर्न उषासो
▾ 007
▾

## ④३१ ‘अग्निर्नःपातु’,

▾ १ देवनक्षत्राणां याज्यानुवाक्याः
▾ विश्वास-टिप्पनी

- zodiac = ऋतस्य पन्था +इति बालगङ्गाधरः।
- टीकाः - तैत्तिरीयब्राह्मणभाष्ये सायणीय [अत्र](#)।
- सर्वस्मिन् भागय् आदिमा ऋक् पुरोनुवाक्या होत्रा - ऽध्वर्युणा चोदितेन - वाच्या। अपरा याज्या ऽध्वर्युणा।

⑥कृत्तिकाः - अग्निः

▾ 01 अग्निर्नः पातु

अग्निर् नः पातु कृत्तिकाः। नक्षत्रन् देवम् (=द्योतमानम्) इन्द्रियम्।
इदम् आसावं विचक्षणम्। हविर् आसञ् जुहोत न।

▾ 01 अग्निर्नः पातु
▾ 02 यस्य भान्ति

यस्य **भान्ति रश्मयो** यस्य केतवः।
यस्येमा विश्वा भुवनानि सर्वा।
स कृत्तिकाभिर् अभि सँवसानः।
अग्निर् नो (=अस्मान्) देवस् **सुविते** (=सुप्राप्ते {कर्मफले}) **दधातु**॥

▾ विश्वास-टिप्पनी

सुविते - अन्तोदात्तः - सूपमानात् क्तः।

▾ 02 यस्य भान्ति

{अग्नये स्वाहा, कृत्तिकाभ्यः स्वाहा।
अम्बायै स्वाहा।
दुलायै स्वाहा।
नितन्त्यै स्वाहा।
अभ्रयन्त्यै स्वाहा।
मेघयन्त्यै स्वाहा।
वर्षयन्त्यै स्वाहा।
चुपुणिकायै स्वाहा।}

▾ ०१ कृत्तिकाः
▾ विश्वास-टिप्पनी





(Pleiades)

- अत्र विषुवदिनम् इति तैत्तिरीयब्राह्मणाद् अनुमेयम् ~ २३०० BCE।

⑥रोहिणी - प्रजापतिः

▾ 03 प्रजापते रोहिणी

प्रजापते(ः) **रोहिणी वेतु** (=भुङ्क्ताम्) पत्नी। विश्वरूपा बृहती चित्रभानुः।
सा नो यज्ञस्य **सुविते**(=सुप्राप्ते {कर्मफले}) **दधातु**। यथा **जीवेम शरदस्** सवीराः।

▾ विश्वास-टिप्पनी

जीवेम - “तास्यनुदात्तेन्ङिददुपदेशाल् लसार्वधातुकम् अनुदात्तम् अन्विङोः” इत्य् अनुदात्तः प्रत्ययः

▾ 03 प्रजापते रोहिणी
▾ 04 रोहिणी

रोहिणी देव्य् उदगात् पुरस्तात्।
विश्वा रूपाणि प्रतिमोदमाना।
प्रजापतिꣳ हविषा **वर्धयन्ती**।
प्रिया देवानाम् **उपयातु यज्ञम्**॥

▾ 04 रोहिणी

{प्रजापतये स्वाहा रोहिण्यै स्वाहा।
रोचमानायै स्वाहा प्रजाभ्यः स्वाहा।}

▾ ०२ रोहिणी
▾ विश्वास-टिप्पनी





(Aldebaran। )

- रोहिद्वर्णा नाम्नैव। ब्रह्महृदयं = capella = β taurii खलु रोहिणीशकटे (Taurus-मुखम्) वर्तते।
- “prajāpatī rohiṇyām agnim asṛjata” इति तैत्तिरीयब्राह्मणे। प्रजापति-रोहिणी-सङ्गमतः कृत्तिकास्व् अग्निर् जात इति कृत्वा तान्त्रिकाग्निमुखे दैवतसङ्गमेनाग्निं जायमानम् भावयन्तीति कस्तूरिरङ्गः।
- प्रजापतिः पुरा मृगशीर्षेण सम्बद्धः, पश्चाद् रोहिण्या, तयोस् सङ्गमतो ऽग्निः कृत्तिकासु जातः - एतद् विषुवस्थानचलन-द्योतकम् भाति।
- प्रजापत्यनुसरणकथा पश्चादुच्यते।
- विषुवदिनम् अत्रावर्तत ३००० BCE इति वर्षे।

⑥मृगशीर्षम् - सोमः

▾ 05 सोमो राजा

**सोमो** राजा मृगशीर्षेण **आगन्न्** (=आयातु)।
शिवन् नक्षत्रम् प्रियम् अस्य धाम।
**आप्यायमानो** बहुधा जनेषु।
रेतꣳ प्रजायँ यजमाने **दधातु**।

▾ 05 सोमो राजा
▾ 06 यत्ते

यत् ते नक्षत्रं **मृगशीर्षम् अस्ति**।
प्रियꣳ राजन् प्रियतमम् प्रियाणाम्।
तस्मै ते सोम **हविषा विधेम**।
शन् न **एधि** द्विपदे शञ् चतुष्पदे॥

▾ विश्वास-टिप्पनी

द्विपदे - “द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ”

▾ 06 यत्ते

{सोमाय स्वाहा मृगशीर्षाय स्वाहा।
इन्वकाभ्यः स्वाहौषधीभ्यः स्वाहा।
राज्याय स्वाहा ऽभिजित्यै स्वाहा।}

▾ ०३ मृगशिरः
▾ विश्वास-टिप्पनी









(Orion belt)

- पुरा प्रजापतिना सम्बद्धम्। "प्रजापतेर् यत् सहजम् पुरस्तात्" इत्यनेन मृगशीर्षे ऽव्यङ्गस्योल्लेखो विशुवकाल इति केचित् - (~Apr 26 Julian 4500 BCE TW)।
  - आग्रहायणी +इत्यपि नाम - पणिन्य्-अमरौ तथा। तैत्तिरीयसंहितायां (७.२ इत्यत्र) आग्रयणम् इत्यपि। पुरा ऽऽग्रयणेष्टयो तदैवाक्रियत - तत्रायनविशेषस्यारम्भात्।
  - वृषाकपिसूक्तम् अपि तद्विषये प्रवृत्तम्, यदा विषुवस्थानं वृषराशाव् अवर्तत।
  - तस्यैव सूर्येणसहोदिते यज्ञकालस्यारम्भो ऽवर्तत - तेन हि तस्य सोमाधिपत्यम्, यज्ञ इति नामान्तरम्।
- सोमो हि ब्राह्मणानां राजा। तस्यैवानुकरणं मेखलया दण्डेन +अजिनेन यज्ञोपवीतेनापि - पारसीकेषु ब्राह्मणेषु च!
- मृगशीर्षकथा ऽध आर्द्राभागे दृश्या।
- वृषाकपिर् इति +ऋग्वेदसूक्त इन्द्रस्य प्रियः, इन्द्राणीमन्युना शुना दष्टः कर्णे, शिरसा खण्डितः, पश्चात्+क्षान्तः।

⑥आर्द्रा - रुद्रः

▾ 07 आर्द्रया रुद्र॰

आर्द्रया॑ रु॒द्रः प्रथ॑मान (=प्रसिद्ध) ए॒ति। श्रेष्ठो॑ दे॒वाना॒म् पति॑र् अघ्नि॒याना॑म् (=गवाम्)।
नक्ष॑त्रम् अस्य ह॒विषा॑ विधेम (=परिचरेम)। मा नः॑ प्र॒जाꣳ री॑रिष॒न् मोत वी॒रान्।

▾ 07 आर्द्रया रुद्र॰

▾ 08 हेती रुद्रस्य

हे॒ती रु॒द्रस्य॒ परि॑ णो वृणक्तु।
आ॒र्द्रा नक्ष॑त्रञ् जु॒षताꣳ ह॒विर् नः॑।
प्र॒मु॒ञ्चमा॑नौ** दुरि॒तानि॒ विश्वा॑।
अपा॑घश॑ꣳसन् नुदता॒म् अरा॑तिम्॥

▾ 08 हेती रुद्रस्य

{रु॒द्राय॒ स्वाहा॒ऽऽर्द्रायै॒ स्वहा॑। पिन्व॑मानायै॒ स्वाहा॑ प॒शुभ्यः॒ स्वाहा॑।}

▾ ०४ आर्द्रा

▾ विश्वास-टिप्पनी






⑥पुनर्वसू - अदितिः

▾ 09 पुनर्नो

पुन॑र् नो दे॒व्य् अदि॑तिस् स्पृणोतु (=प्रीणयतु)।
पुन॑र्वसू नः॒ पुन॒र् आ+इ॑ता॒ꣳ य॒ज्ञम्।
पुन॑र् नो दे॒वा अ॒भिय॑न्तु॒ सर्वे॑।
पुनः॑-पुन॒र् वो ह॒विषा॑ यजामः।

▾ 09 पुनर्नो

▾ 10 एवा न

ए॒वा न दे॒व्य् अदि॑तिर् अन॒र्वा (=अनर्वाचीना)। विश्व॑स्य भ॒र्त्री जग॑तः॒ प्रति॑ष्ठा।
पुन॑र्वसू ह॒विषा॑ व॒र्धय॑न्ती। प्रि॒यम् दे॒वाना॒म् अप्य् ए॑तु॒ पाथः॑ (=हविः)॥

▾ 10 एवा न

{अदि॑त्यै॒ स्वाहा॒ पुन॑र्वसुभ्याम्॒ स्वाहा।
भूत्यै॒ स्वाहा॒ प्रजा॑त्यै॒ स्वाहा॑।}

▾ ०५ पुनर्वसू

▾ विश्वास-टिप्पनी






(α , β Geminorum - Castor and Pollux)

⑥तिष्यम् / पुष्यम् - बृहस्पतिः

▾ 11 बृहस्पतिः॰ प्रथमञ्जायमानः

बृह॒स्पतिः॑ प्रथ॒मञ् जाय॑मानः। ति॒ष्य॑न् नक्ष॑त्रम् अ॒भि सम्ब॑भूव।
श्रेष्ठो॑ दे॒वाना॒म् पृत॑नासु जि॒ष्णुः। दिशो॒ऽनु॒ सर्वा॒ अभ॑यन् नो अस्तु।

▾ 11 बृहस्पतिः॰ प्रथमञ्जायमानः

▾ 12 तिष्यः॰ पुरस्तादुत

ति॒ष्यः॑ पु॒रस्ता॑द् उ॒त म॑ध्य॒तो नः॑। बृह॒स्पति॑र् नः॒ परि॑ पातु प॒श्चात्।
बाधे॑तान् द्वेषो॒ अभ॑यङ् कृणुताम्। सु॒वीर्य॑स्य॒ पत॑यस् स्याम।

▾ 12 तिष्यः॰ पुरस्तादुत

{बृह॒स्पत॑ये॒ स्वाहा॑ ति॒ष्या॑य॒ स्वाहा॑।
ब्र॒ह्म॒व॒र्च॒साय॒ स्वाहा॑।}

▾ ०६ तिष्यः

▾ विश्वास-टिप्पनी






γ, δ and θ Cancri इति केचित्। Praesepe open cluster (M44) इति केचित्।

⑥आश्रेषाः - सर्पाः

▾ 13 इद सर्पेभ्यो

इ॒दꣳ स॒र्पेभ्यो॑ ह॒विर् अ॑स्तु॒ जुष्ट॑म्। आ॒श्रे॒षा येषा॑म् अनु॒यन्ति॒ चेतः॑।
ये अ॒न्तरि॑क्षम् पृथि॒वीङ् क्षि॒यन्ति॑(=अधिवसन्ति)। ते न॑स् स॒र्पासो॑ हव॒म् आग॑मिष्ठाः।

▾ 13 इद सर्पेभ्यो

▾ 14 ये रोचने

ये रो॑च॒ने (मण्डले) सूर्य॒स्यापि॑ स॒र्पाः। ये दिव॑न् दे॒वीम् अनु॑ स॒ञ्चर॑न्ति।
येषा॑म् आश्रे॒षा अ॑नु॒यन्ति॒ काम॑म्। तेभ्य॑स् स॒र्पेभ्यो॒ मधु॑मज् जुहोमि।

▾ 14 ये रोचने

{स॒र्पेभ्यः॒ स्वाहा॑ऽऽश्रे॒षाभ्यः॒ स्वाहा॑।}
द॒न्द॒शू॒के॑भ्यः॒ स्वाहा॑॥

▾ ०७ आश्रेषा

▾ विश्वास-टिप्पनी





- δ, ε, η, ρ, σ, θ Hydrae
- वेदाङ्गज्योतिषानुसारम् अस्य मध्य आसीद् अयनारम्भः ~ ११०० BCE इत्यस्मिन्।

⑥मघाः - पितरः

▾ 15 उपहूताः॰ पितरो

उप॑हूताः॒ पि॒तरो॒ ये म॒घासु॑। मनो॑जवसस् सु॒कृत॑स् सुकृ॒त्याः।
ते नो॒ नक्ष॑त्रे हव॒म् आग॑मिष्ठाः। स्व॒धाभि॑र् य॒ज्ञम् प्रय॑तञ् जुषन्ताम्।

▾ 15 उपहूताः॰ पितरो

▾ 16 ये अग्निदग्धा

ये अ॑ग्निद॒ग्धा ये ऽन॑ग्निदग्धाः। ये ऽमुल्ँ लो॒कम् पि॒तरः॑ क्षि॒यन्ति॑।
याꣳश् च॑ वि॒द्म याꣳ उ॑ च॒ न प्र॑वि॒द्म। म॒घासु॑ य॒ज्ञꣳ सुकृ॑तम् जुषन्ताम्॥

▾ 16 ये अग्निदग्धा

{पि॒तृभ्यः॒ स्वाहा॑ म॒घाभ्यः॒ स्वाहा॑ऽन॒घाभ्यः॒ स्वाहा॑
अ॒ग॒दाभ्यः॒ स्वाहा॑ ऽरुन्ध॒तीभ्यः॒ स्वाहा॑।}

▾ ०८ मघाः

▾ विश्वास-टिप्पनी





- Regulus इति केचित्। " 6 stars - entire sickle of Leo" इत्यन्ये।

⑥पूर्व-फल्गुन्यः - अर्यमा

▾ 17 गवाम्पतिः फल्गुनीनामसि

गवा॑म् पतिः॒ फल्गु॑नीनाम् **असि॒** त्वम्।
तद् अ॑र्यमन् वरुण-मित्र॒ चारु॑।
तन् त्वा॑ व॒यꣳ स॑नि॒तार॑ꣳ (=दातारं) सनी॒नाम् (=दातव्यानाम्) (←नाम् अन्यतरस्याम् इत्य् अन्तोदात्तत्वात् स्वरः)।
जी॒वा जीव॑न्त॒म् उप॒ **सं॒विशे॑म**।

▾ 17 गवाम्पतिः फल्गुनीनामसि

▾ 18 येनेमा विश्वा

येने॒मा विश्वा॒ भुव॑नानि॒ **संजि॑ता**। यस्य॑ दे॒वा **अ॑नु॒संय॒न्ति** चेतः॑।
अ॒र्य॒मा राजा॒ ऽजर॒स् **तुवि॑ष्मान्** (=वृद्धिमान्)। फल्गु॑नीनाम् ऋष॒भो **रो॑रवीति**॥

▾ 18 येनेमा विश्वा

{अ॒र्य॒म्णे स्वाहा॒ फल्गु॑नीभ्या॒ꣳ॒ स्वाहा॑।
प॒शुभ्यः॒ स्वाहा॑।}

▾ ०९ फाल्गुन्यः

▾ विश्वास-टिप्पनी





(=δ, θ Leonis)

- अत्र वै यदा चन्द्रमा ऽवर्तत ३००० BCE इति वर्षे, तदाभूद् वत्सरारम्भः।
  - विवरणानि सौर-चान्द्र-मान-पृष्ठे।

⑥उत्तर-फल्गुन्यः - भगः

▾ 19 श्रेष्ठो देवानाम्भगवो

श्रेष्ठो॑ दे॒वानां॑म् भगवो **भगासि**। तत् त्वा॑ **वि॒दुः॒** फल्गु॑नी॒स्, तस्य॑ वित्तात् (=विद्धि)।
अ॒स्मभ्य॑ङ् क्ष॒त्रम् अ॒जर॑ꣳ सु॒वीर्य॑म्। गोम॑द् अश्व॑वद् उप॒ सन् **नुदे॒ह**।

▾ 19 श्रेष्ठो देवानाम्भगवो

▾ 20 भगो ह

भगो॑ ह दा॒ता भग॒ इत् प्र॑दा॒ता। भगो॑ दे॒वीः॒ फल्गु॑नी॒र् **आवि॑वेश**।
भग॒स्येत् तम् प्र॑स॒वङ् **ग॑मेम**। यत्र॑ दे॒वैस् स॑ध॒माद॑ (=सहहर्षं) **मदे॑म** (=प्राप्नुयाम)।॥

▾ 20 भगो ह

{भगा॑य स्वाहा॒ फल्गु॑नीभ्या॒ꣳ॒ स्वाहा॑।
श्रेष्ठाया॑य॒ स्वाहा॑।}

▾ १० फाल्गुन्यः

▾ विश्वास-टिप्पनी





Denebola - β, 93 Leonis

⑥हस्तः - सविता

▾ 21 आयातु देवस्सवितोपयातु

आया॑तु दे॒वस् **स॑वि॒तोप॑यातु**।
हि॒र॒ण्यये॑न सु॒वृता॒ रथे॑न।
**वहन्॒** हस्त॑ꣳ सु॒भग॑वँ वि॒द्मनाप॑सम् (=विदितकर्मणा युक्तम्)।
**प्रयच्छ॑न्तम्** पपु॑रिम् (=पूरयितारम्) पुण्य॑म् अच्छ॑ (=अभिमुखं वर्तमानम्)।

▾ 21 आयातु देवस्सवितोपयातु

▾ 22 हस्तः

हस्त॒ꣳ॒ **प्रय॑च्छत्व्** अ॒मृत॑वँ॒ वसी॑यः।
दक्षि॑णेन॒ **प्रति॑गृभ्णीम** एनत्।
दा॒तार॑म् अ॒द्य ([यः]) स॑वि॒ता **वि॑देय** (=लभेय)।
यो नो॒ हस्ता॑य **प्र॒सु॒वाति॑** य॒ज्ञम्॥

▾ 22 हस्तः

{स॒वि॒त्रे स्वाहा॒ हस्ता॑य॒ स्वाहा॑
ऽऽद॒दते स्वाहा॑ पृण॒ते स्वाहा॑
प्र॒यच्छ॑ते स्वाहा॑ प्रतिगृभ्ण॒ते स्वाहा॑।}

▾ ११ हस्तः

▾ विश्वास-टिप्पनी





Corvus- α , β , γ , δ , ε Corvi.

⑥चित्रा - त्वष्टा

▾ 23 त्वष्टा नक्षत्रमभ्येति

त्वष्टा॒ नक्ष॑त्रम् **अ॒भ्ये॑ति** चि॒त्राम् (=Spica)।
सु॒भꣳ॑स॒सय॑ँ (=सुजघनां) यु॒व॒तिꣳ **रोच॑मानाम्**।
**नि॒वे॒शय॑न्न्** अ॒मृता॒न् मर्त्या॑ꣳश् च।
रू॒पाणि॑ **पि॒ꣳ॒शन्** (=निरूपयन्) भुव॑नानि॒ विश्वा॑।

▾ 23 त्वष्टा नक्षत्रमभ्येति

▾ 24 तन्नस्त्वष्टा तद्

तन् न॒स् त्वष्टा॒ तद् उ॑ चि॒त्रा **विच॑ष्टाम्** (=वीक्षताम्)।
तन् नक्ष॑त्रम् **भू॒रि॒दा अ॑स्तु** मह्य॑म्।
तन्नः॑ प्र॒जाव॑ँ वी॒रव॑तीꣳ **सनो॒तु** (=ददातु)।
गोभि॑र् नो॒ अश्वै॒स् **सम॑नक्तु** य॒ज्ञम्॥

▾ 24 तन्नस्त्वष्टा तद्

{त्वष्ट्रे॒ स्वाहा॑ चि॒त्रायै॒ स्वाहा॑।
चैत्रा॑य॒ स्वाहा॑ प्र॒जायै॒ स्वाहा॑।}

▾ १२ चित्रा

▾ विश्वास-टिप्पनी





⑥निष्ट्या, स्वातिः - वायुः

▾ 25 वायुर्नक्षत्रमभ्येति

वा॒युर् नक्ष॑त्रम् **अ॒भ्ये॑ति** निष्ट्या॑म्(=Arctrus)।
ति॒ग्मशृ॑ङ्गो वृष॒भो **रोरु॑वाणः**।
**स॒मी॒रय॑न्** भुव॑ना मात॒रिश्वा॑ (←मातरि आकाशे श्वयति वर्द्धते)।
**अप॒** द्वेषा॑ꣳसि **नु॒दताम्** अरा॑तीः।

▾ 25 वायुर्नक्षत्रमभ्येति

▾ 26 तन्नो वायुस्तद्

तन् नो॑ वा॒युस् तद् उ॒ निष्ट्या॑ **शृणोतु**।
तन् नक्ष॑त्रम् **भू॒रि॒दा अ॑स्तु** मह्य॑म्।
तन् नो॑ दे॒वासो॒ **अनु॑जानन्तु** काम॑म्।
यथा॒ **तरे॑म** दुरि॒तानि॒ विश्वा॑॥

▾ 26 तन्नो वायुस्तद्

{वा॒यवे॒ स्वाहा॒ निष्ट्या॑यै॒ स्वाहा॑।
का॒म॒चारा॑य॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहा॑।}

▾ १३ स्वातिः

▾ विश्वास-टिप्पनी






⑥विशाखे - इन्द्राग्नी

▼ 27 दूरमस्मच्छत्रवो यन्तु

दूरम् अस्मच्-छत्रवो **यन्तु** भीताः।
तद् इन्द्राग्नी **कृणुताम्** तद् विशाखे।
तन् नो देवा **अनुमदन्तु** यज्ञम्।
पश्चात् पुरस्ताद् अभयन् नो **अस्तु**।

▼ 27 दूरमस्मच्छत्रवो यन्तु

▼ 28 नक्षत्राणामधिपत्नी

नक्षत्राणाम् अधिपत्नी विशाखे।
श्रेष्ठाव् इद्राग्नी भुवनस्य गोपौ।
विषूचश् (=विभिन्नगतीन्) शत्रून् **अप बाधमानौ**।
अप क्षुधन् **नुदताम्** अरातिम्।॥

▼ 28 नक्षत्राणामधिपत्नी

{इन्द्राग्निभ्याꣳ स्वाहा विशाखाभ्याꣳ स्वाहा।
श्रैष्ठ्याय स्वाहाऽभिजित्यै स्वाहा।}

▼ १४ विशाखे

▼ विश्वास-टिप्पनी






α, β Librae। रामायणानुसारम् इक्ष्वाकूणां नक्षत्रम् - 6.4.51

⑥पूर्णिमा

▼ 29 पूर्णा पश्चादुत

पूर्णा पश्चाद् उत पूर्णा पुरस्तात्।
उन् मध्यतꣳ पौर्णमासी **जिगाय** (शत्रून्)।
तस्यान् देवा अधि **सवँवसन्तः**।
उत्तमे नाक इह **मादयन्ताम्**।

▼ 29 पूर्णा पश्चादुत

▼ 30 पृथ्वी सुवर्चा

पृथ्वी (=विस्तीर्णा) सुवर्चा युवतिः सजोषाः।
पौर्णमास्य् **उदगाच्** छोभमाना।
(दुर्गतिपरिहारेण) **आप्याययन्ती** दुरितानि विश्वा।
उरुन्(=विस्तीर्णाम्) दुहायँ (लिङ्गव्यत्ययः विभिक्तिव्यत्ययो वा) यजमानाय यज्ञम्।

▼ 30 पृथ्वी सुवर्चा

{पौर्णमास्यै स्वाहा कामाय स्वाहा गत्यै स्वाहा}

▼

④३२ 'ऋद्ध्यास्म',

▼ २, यमनक्षत्राणां याज्यानुवाक्याः

⑥अनूराधाः - मित्रः

▼ 01 ऋद्ध्यास्म

**ऋद्ध्यास्म** हव्यैर् **नमसोपसद्य**,, मित्रन् देवं(।), मित्रधेयन् (=मित्रेण सम्पाद्यन्) नो **अस्तु**।
अनूराधान् हविषा **वर्धयन्तः**।
शतञ् **जीवेम** शरदः सवीराः।

▼ 01 ऋद्ध्यास्म

▼ 02 चित्रन्नक्षत्रमुदगात्पुरस्तात्

चित्रम् नक्षत्रम् **उदगात्** पुरस्तात्।
अनूराधास इति यद् **वदन्ति**।
तन् मित्र **एति** पथिभिर् देवयानैः।
हिरण्ययैर् विततैर् अन्तरिक्षे॥

▼ 02 चित्रन्नक्षत्रमुदगात्पुरस्तात्

{मित्राय स्वाहा ऽनूराधेभ्यः स्वाहा।
मित्रधेयाय स्वाहा ऽभिजित्यै स्वाहा।}

▼ १५ अनुराधाः

▼ विश्वास-टिप्पनी






β, δ, η, ρ Scorpionis

⑥ज्येष्ठा - इन्द्रः

▼ 03 इन्द्रो ज्येष्ठामनु

इन्द्रो ज्येष्ठाम् अनु नक्षत्रम् **एति**।
यस्मिन् वृत्रवँ वृत्रतूर्ये (=वृत्रवधे) **ततार**।
तस्मिन् वयम् अमृतन् **दुहानाः**।
क्षुधन् **तरेम** दुरितिन् दुरिष्टिम्।

▼ 03 इन्द्रो ज्येष्ठामनु

▼ 04 पुरन्दराय वृषभाय

पुरन्दराय वृषभाय धृष्णवे।
अषाढाय (=अपरिभूताय) सहमानाय मीढुषे (=सेचकाय {वृष्ट्या})।
इन्द्राय ज्येष्ठा मधुमद् **दुहाना**।
**उरुङ् कृणोतु** यजमानस्य लोकम्।॥

▼ 04 पुरन्दराय वृषभाय

{इन्द्राय स्वाहा ज्येष्ठायै स्वाहा।
ज्यैष्ठ्याय स्वाहा ऽभिजित्यै स्वाहा।}

▼ १६ ज्येष्ठा

▼ विश्वास-टिप्पनी






(α, σ, and τ Scorpionis इति केचित्। Antares इत्यन्ये - द्वितीया रोहिणीवेति ब्राह्मणम्।)

⑥मूलम् - निर्ऋतिः

▼ 05 मूलम्प्रजावँ वीरवतीवँ

मूलम् प्रजावँ वीरवतीवँ **विदेय**(=लभेय)।
पराच्य(=पराङ्मुखा) **एतु** निर्ऋतिꣳ पराचा (मार्गेण)।
गोभिर् नक्षत्रम् (एव) पशुभिस् **समक्तम्,**
अहर् **भूयाद्** यजमानाय मह्यम्।

▼ 05 मूलम्प्रजावँ वीरवतीवँ

▼ 06 अहर्नो अद्य

अहर् नो अद्य सुविते (=सुप्राप्ते {कर्मफले}) **दधातु**। मूलन् नक्षत्रम् इति यद् **वदन्ति**।
पराचीवँ वाचा निर्ऋतिन् **नुदामि**।
शिवम् प्रजायै शिवम् **अस्तु** मह्यम्॥

▼ 06 अहर्नो अद्य

{प्रजापतये स्वाहा मूलाय स्वाहा।
प्रजायै स्वाहा।}

▼ १७ मूलम्

▼ विश्वास-टिप्पनी






(ζ, η, θ, ι, κ, λ, and ν Scorpionis। मूलायाङ्क्ल्व् आकाशगङ्गाकेन्द्रम् अपि वर्तते!)

⑥अषाढाः पूर्वाः - आपः

▼ 07 या दिव्या

या दिव्या आपꣳ पयसा **सम्बभूवुः**(=आकाशगङ्गा पार्श्वे वर्तमाना)।
(मेघादिरूपा) या अन्तरिक्ष उत (नद्यादिषु) पार्थिवीर् याः।
यासाम् अषाढा **अनुयन्ति** कामम्।

ता न॒ आप॒ः श॒ꣳ स्यो॒ना (=सुखहेतवः) **भ॑वन्तु**।

▼ 07 या दिव्या

▼ 08 याश्च कूप्या

याश्॒ च कू॒प्या॒ याश्॒ च॑ ना॒द्या॑स्॒ स॒मु॒द्रियाः॑।
याश्॒ च॑ वैश॒न्तीर्॒ (=पल्वलभवाः) उ॒त प्रा॑स॒चीर्॒ (=प्रागता) याः।
यासा॑म्॒ अ॒षा॒ढा मधु॑ **भ॒क्षय॑न्ति**।
ता न॒ आप॒ः श॒ꣳ स्यो॒ना (=सुखहेतवः) **भ॑वन्तु**॥

▼ 08 याश्च कूप्या

{अ॒द्भ्यः स्वाहा॑ ऽषा॒ढाभ्य॒ः स्वाहा॑।
स॒मु॒द्राय॒ स्वाहा॒ कामा॑य॒ स्वाहा॑।}

▼ १८ अषाढाः

▼ विश्वास-टिप्पनी






(δ, γ, η and ε Sagittarii। जलरूपाया आकाशङ्गङ्गायाः केन्द्रम् अस्य पार्श्वे।)

⑥अषाढाः उत्तराः - विश्वे देवाः

▼ 09 तन्नो विश्वे

तन्॒ नो॒ विश्वे॒ उप॑ **शृ॒ण्वन्तु** दे॒वाः।
तद्॒ अ॑षा॒ढा **अ॒भिसंय॑न्तु** य॒ज्ञम्॒।
तन्॒ नक्ष॑त्रम्॒ **प्रथताम्॒** प॒शुभ्य॑ः।
कृ॒षिर्॒ वृ॒ष्टिर्॒ यज॑मानाय **कल्पताम्॒**।

▼ 09 तन्नो विश्वे

▼ 10 शुभ्राx कन्या

शु॒भ्राx क॒न्या॑ यु॒व॒तय॑स्॒ सु॒पेश॑सः।
क॒र्म॒कृत॑स्॒ सु॒कृतो॑ वी॒र्या॑वतीः।
विश्वा॑न्॒ दे॒वान्॒ ह॒विषा॑ **व॒र्धय॑न्तीः**।
अ॒षा॒ढाx काम॒म्॒ **उपा॑यन्तु** य॒ज्ञम्॒॥

▼ 10 शुभ्राx कन्या

{विश्वे॑भ्यो दे॒वेभ्य॒ः स्वाहा॑ ऽषा॒ढाभ्य॒ः स्वाहा॑।
अ॒न॒प॒ज॒य्याय॒ स्वाहा॒ जित्यै॒ स्वाहा॑।}

▼ १९ अषाढाः

▼ विश्वास-टिप्पनी






(φ, ζ, tau and σ Sagittarii)

⑥अभिजित्

▼ 11 यस्मिन्ब्रह्माऽभ्यजयथ्सर्वमेतत्

यस्मि॒न्॒ **ब्र॒ह्मा॒भ्यजं॑य॒त्** सर्व॑म्॒ ए॒तत्।
अ॒मु॒ञ्॒ च॑ लो॒कम्॒ इ॒दम्॒ ऊं॑ च॒ सर्व॑म्।
तन्॒ नो॒ नक्ष॑त्रम्॒ अ॒भि॒जिद्॒ **वि॒जित्यं॑**।
श्रियं॑न्॒ **द॒धा॒त्व्॒** अहृ॑णीयमानम्।

▼ 11 यस्मिन्ब्रह्माऽभ्यजयथ्सर्वमेतत्

▼ 12 उभौ लोकौ

उ॒भौ लो॒कौ ब्र॒ह्मणा॑ **स॒ञ्जि॑तेमौ**।
तन्॒ नो॒ नक्ष॑त्रम्॒ अ॒भि॒जिद्॒ **विच॑ष्टाम्॒** (=विख्यापयतु)।
तस्मि॑न्॒ व॒यम्॒ पृत॑ना॒स्॒ **सञ्ज॑येम**।
तन्॒ नो॑ दे॒वासो॒ **अनु॑जानन्तु** काम॑म्॥

▼ 12 उभौ लोकौ

{ब्र॒ह्मणे॑ स्वाहा॑ ऽभि॒जि॒ते॒ स्वाहा॑।
ब्र॒ह्म॒लो॒काय॒ स्वाहा॒ ऽभि॒जि॑त्यै॒ स्वाहा॑।}

▼ २० अभिजित्

▼ विश्वास-टिप्पनी






(Vega)

⑥श्रोणा / श्रवणम् - विष्णुः

▼ 13 शृण्वन्ति श्रोणाममृतस्य

**शृ॒ण्वन्ति॑** श्रो॒णाम्॒ अ॒मृत॑स्य गो॒पाम्।
पुण्या॑म्॒ अ॒स्या॒ **उप॑शृणोमि॒** वाच॑म्।
म॒हीन्॒ दे॒वीवँ॒ विष्णु॑-पत्नीम्॒ अ॒जू॒र्याम्(=अज्वराम्)।
प्र॒तीची॑म्॒ एना॒ꣳ ह॒विषा॑ **यजामः**।

▼ 13 शृण्वन्ति श्रोणाममृतस्य

▼ 14 त्रेधा विष्णुरुरुगायो

त्रे॒धा विष्णु॑र्॒ उ॒रु-गा॒यो(गेयो) **विच॑क्रमे**।
म॒हीन्॒ दिव॑म्॒ पृ॒थि॒वीम्॒ अ॒न्तरि॑क्षम्।
तच्॒ **छ्रो॒णैति॒** (अत्र) श्रव॑(=कीर्तिम्) **इ॒च्छमा॑ना**।
पुण्य॒ꣳ॒ श्लोक॒यँ॒ यज॑मानाय **कृ॒ण्वती**॥

▼ 14 त्रेधा विष्णुरुरुगायो

{विष्ण॑वे॒ स्वाहा॑ श्रो॒णायै॒ स्वाहा॑।
श्लोका॑य॒ स्वाहा॑ श्रु॒ताय॒ स्वाहा॑।}

▼ २० श्रोणा

▼ विश्वास-टिप्पनी






(α, β and γ Aquilae)

⑥धनिष्ठाः/ श्रविष्ठाः - वसवः

▼ 15 अष्टौ देवा

अ॒ष्टौ दे॒वा वस॑वस्॒ सो॒म्यास॑ः।
चत॑स्रो दे॒वीर्॒ अ॒जराः॒ श्रवि॑ष्ठाः।
ते य॒ज्ञम्॒ **पान्तु॒** रज॑सꣳ॒ पु॒रस्ता॑त्।
स॒व्ँ॒व॒त्स॒रीण॑म्॒ अ॒मृत॒ꣳ स्व॒स्ति।

▼ 15 अष्टौ देवा

▼ 16 यज्ञन्नꣳ पान्तु

य॒ज्ञन्॒ नꣳ॑ **पान्तु॒** वस॑वꣳ पु॒रस्ता॑त्।
द॒क्षि॒ण॒तो॑ **ऽभिय॑न्तु** श्रवि॑ष्ठाः।
पुण्य॒न्॒ नक्ष॑त्रम्॒ **अ॒भि सव्ँवि॑शाम**।
मा नो॒ अरा॑तिर्॒ अ॒घश॒ꣳ॒सा **ऽगं॑न्**॥

▼ 16 यज्ञन्नꣳ पान्तु

{वसु॑भ्य॒ः स्वाहा॒ श्रवि॑ष्ठाभ्य॒ः स्वाहा॑।
अग्रा॑य॒ स्वाहा॒ परी॑त्यै॒ स्वाहा॑।}

▼ २१ श्रविष्ठा

▼ विश्वास-टिप्पनी






(α to δ Delphini)

⑥शतभिषग् - वरुणः

▼ 17 क्ष्वत्रस्य राजा

क्ष॒त्रस्य॒ रा॒जा॒ वरु॑णो ऽधिरा॒जः।
नक्ष॑त्राणा॒ꣳ श॒तभि॑ष॒ग्॒ वसि॑ष्ठः।
तौ दे॒वेभ्य॑x **कृणुतो** दी॒र्घम्॒ आयु॑ः।
श॒त॒ꣳ स॒हस्रा॑ भे॒षजानि॑ **धत्तः**।

▼ 17 क्ष्वत्रस्य राजा

▾ 18 यज्ञो राजा

यज्ञन् नो राजा वरुण **उपयातु**।
तन् नो विश्वे **अभि संयन्तु** देवाः।
तन् नो नक्षत्रꣳ शतभिषग् **जुषाणम्**।
दीर्घम् आयुꣳ **प्रति रद**(=दद्यात्) भेषजानि॥

▾ 18 यज्ञो राजा

{वरुणाय स्वाहा शतभिषजे स्वाहा।
भेषजेभ्यः स्वाहा।}

▾ २२ शतभिषा

▾ विश्वास-टिप्पनी






(Sadachbia = γ Aquarii इति केचित्। Fomalhaut स्याद् इत्यन्ये।)

⑥प्रोष्ठपदाः/ भाद्रपदाः पूर्वाः - अज एकपात्

▾ 19 अज एकपादुदगात्पुरस्तात्

अज एकपाद् **उदगात्** पुरस्तात्।
विश्वा भूतानि प्रति मोदमानः।
तस्य देवाꣳ प्रसवयꣳ **यन्ति** सर्वे।
प्रोष्ठपदासो अमृतस्य गोपाः।

▾ 19 अज एकपादुदगात्पुरस्तात्

▾ 20 विभ्राजमानस्समिधान उग्रः

विभ्राजमानस् समिधान उग्रः।
आ ऽन्तरिक्षम् **अरुहद् अगन्**(=प्राप्नोत्) द्याम्।
तꣳ सूर्यन् देवम् अजम् एकपादम्।
प्रोष्ठपदासो **अनुयन्ति** सर्वे॥

▾ 20 विभ्राजमानस्समिधान उग्रः

{अजायैकपदे स्वाहा प्रोष्ठपदेभ्यः स्वाहा।
तेजसे स्वाहा ब्रह्मवर्चसाय स्वाहा।}

▾ २३ प्रोष्ठपदः

▾ विश्वास-टिप्पनी






(α and β Pegasi)

[bce-3000 naxatra-chakra]
bce-3000 naxatra-chakra

- धिष्णियाभिस् ताक्ष्र्य-सम्बन्धो ऽन्यत्र प्रपञ्चितः। सर्वम् एतद् अन्यत्र प्रपञ्चितम्।
- ३००० BCE इति काले ऽत्र परिसरे ऽवर्तत +अयनवर्तन-स्थानम्।

⑥प्रोष्ठपदाः/ भाद्रपदाः उत्तराः - अहिर् बुध्नियः

▾ 21 अहिर्बुध्नियꣳ प्रथमान

अहिर् बुध्नियꣳ(=मूलस्थः) **प्रथमान एति**।
श्रेष्ठो देवानाम् उत मानुषाणाम्।
तम् ब्राह्मणास् सोमपास् सोम्यासः(=रमणीयदेहाः)।
प्रोष्ठपदासो **अभिरक्षन्ति** सर्वे।

▾ 21 अहिर्बुध्नियꣳ प्रथमान

▾ 22 चत्वार एकमभिकर्म

चत्वार एकम् अभि कर्म देवाः।
प्रोष्ठपदास् इति यान् **वदन्ति**।
ते बुध्नियम् परिषद्यꣳ **स्तुवन्तः**।
अहिꣳ **रक्षन्ति नमसोपसद्य**॥

▾ 22 चत्वार एकमभिकर्म

{अहये बुध्नियाय स्वाहा प्रोष्ठपदेभ्यः स्वाहा।}

▾ २४ प्रोष्ठपदः

▾ विश्वास-टिप्पनी






(γ Pegasi and α Andromedae)

[bce-3000 naxatra-chakra]
bce-3000 naxatra-chakra

- यदा मृगशीर्षे बभूव विषुवस्थानम्, अत्रासीत् सौरं दक्षिणतमम् अयनम्। विश्व-स्कम्भमूलस्थो ऽहिर्बुध्नियः। स च प्रोष्ठपदास्व् अपि कल्पितः प्रायेण तेनैव कारणेन।
- धिष्णियाभिस् ताक्ष्र्य-सम्बन्धो ऽन्यत्र प्रपञ्चितः। सर्वम् एतद् अन्यत्र प्रपञ्चितम्।

⑥रेवती - पूषा

▾ 23 पूषा रेवत्यन्वेति

पूषा रेवत्य् **अन्वेति** पन्थाम्।
पुष्टिपती पशुपा वाज(=अन्न)बस्त्यौ(बलौ)।
इमानि हव्या **प्रयता जुषाणा**।
सुगैर् नो यानैर् **उपयाताꣳ** यज्ञम्।

▾ 23 पूषा रेवत्यन्वेति

▾ 24 क्षुद्रान्पशून्रक्षतु

क्षुद्रान् पशून् **रक्षतु** रेवती नः।
गावो नो अश्वाꣳ **अन्वेतु** पूषा।
अन्नꣳ **रक्षन्तौ** बहुधा विरूपम्।
वाजꣳ(=अन्नम्) **सनुताꣳ**(=दत्ताम्) यजमानाय यज्ञम्॥

▾ 24 क्षुद्रान्पशून्रक्षतु

{पूष्णे स्वाहा रेवत्यै (=ζ Piscium) स्वाहा।
पशुभ्यः स्वाहा।}

▾ २५ रेवती

▾ विश्वास-टिप्पनी






(ζ Piscium)

⑥अश्विनौ

▾ 25 तदश्विनावश्वयुजोपयाताम्

तद् अश्विनाव् **अश्वयुजोपयाताम्**।
शुभङ् **गमिष्ठौ** सुयमेभिर् अश्वैः।
स्वन् नक्षत्रꣳ हविषा **यजन्तौ**।
मध्वा **सम्पृक्तौ** यजुषा **समक्तौ**।

▾ 25 तदश्विनावश्वयुजोपयाताम्

▾ 26 यौ देवानाम्भिषजौ

यौ देवानाम् भिषजौ हव्यवाहौ।
विश्वस्य दूताव् अमृतस्य गोपौ।
तौ नक्षत्रञ् **जुजुषाणोपयाताम्**।
नमो ऽश्विभ्याङ् **कृणुमो** ऽश्वयुग्भ्याम्॥

▾ 26 यौ देवानाम्भिषजौ

{अश्विभ्याꣳ स्वाहाऽश्वयुग्भ्याꣳ स्वाहा।
श्रोत्राय स्वाहा श्रुत्यै स्वाहा।}

▾ २६ अश्विनौ

▾ विश्वास-टिप्पनी






(β and α Arietis)

- “अश्विनौ व्यात्तम्” इत्युत्तरनारयणे। भरणीविषुवकाले। विवरणानि अत्र।
- पश्चाद् विशुवस्थानम् अत्र।

⑥भरणी - यमः

▼ 27 अप पाप्मानम्भरणीर्भरन्तु

अप॑ पा॒प्मान॒म् भर॑णीर् (=35, 39, 41 Arietis) **भरन्तु**।
तद् य॒मो रा॒जा भग॑वा॒न् **विच॑ष्टाम्**।
लो॒कस्य॒ राजा॑ मह॒तो म॒हान् हि।
सु॒गन् न॒ꣳ पन्था॒म् अभ॑यङ् **कृणोतु**।

▼ 27 अप पाप्मानम्भरणीर्भरन्तु

▼ 28 यस्मिन्नक्ष्त्रे यम

यस्मि॒न् नक्ष॑त्रे य॒म **एति॒** राजा॑।
यस्मि॑न्न् एनम् **अ॒भ्यषि॑ञ्चन्त** दे॒वाः।
तद् अ॑स्य चि॒त्रꣳ ह॒विषा॑ **यजाम**।
अप॑ पा॒प्मान॒म् भर॑णीर् **भरन्तु**॥

▼ 28 यस्मिन्नक्ष्त्रे यम

{य॒माय॒ स्वाहा॑ ऽप॒भर॑णीभ्य॒स् स्वाहा᳚ ।
रा॒ज्याय॒ स्वाहा॒ ऽभिजि॑त्यै॒ स्वाहा᳚ ॥55॥}

▼ २७ भरणी

▼ विश्वास-टिप्पनी






(35, 39, and 41 Arietis)

⑥अमावास्या

▼ 29 निवेशनी

नि॒वेश॑नी स॒ङ्गम॑नी॒ वसू॑ना॒वँ,
विश्वा॑ रू॒पाणि॒ वसू॑न्य् **आवे॒शय॑न्ती**।
स॒ह॒स्र॒पो॒षꣳ सु॒भगा॒ **ररा॑णा॒**
सा न॒ **आग॒न्** वर्च॑सा सव्ँवि॒दा॒ना॥

▼ 29 निवेशनी

▼ 30 यत्ते देवा

यत् ते॑ दे॒वा **अद॑धुर्** भाग॒-धेय॒म्
अमा॑वास्ये **सव्ँवस॑न्तो** महि॒त्वा।
सा नो॑ य॒ज्ञम् **पिपृहि**(←पालनपूरणयोः) विश्व-वारे(←वरणे?)
र॒यिन् नो॑ **धेहि** सुभगे सु॒वीर॑म्॥

▼ 30 यत्ते देवा

{अ॒मा॒वा॒स्या॑यै॒ स्वाहा॒ कामा॑य॒ स्वाहा गत्यै॒ स्वाहा॑।}

▼

## ④३३ 'नवोनवो भवति'

‘नवोनवो भवति’ इत्यनुवाकान्

▼ ३, चान्द्रमासादीनां सप्तानामिष्टीनां याज्यानुवाक्याः

⑥चन्द्रमाः

▼ १९ नवोनवो भवति

नवो॑नवो **भवति॒** जाय॑मा॒नो
ऽह्ना॑ के॒तुर् उ॒षसा॑म् **ए॒त्य्** अग्र॑म् (कृष्णपक्षे)।
भा॒गं (सोमपाभ्यो) दे॒वेभ्यो॒ **वि दधात्य् आ॒यन्**
प्र च॒न्द्रमा॑स् **तिरते**(=वर्धयति) दी॒र्घम् आयुः॑ ॥१९

▼ 019

▼ विश्वास-प्रस्तुतिः

यम् (सोमं) आदि॒त्या अ॒ꣳ॒शुम् **आ᳚प्या॒यय॑न्ति॒**
यम् अक्षि॑त॒म् अक्षि॑तय॒ꣳ **पिब॑न्ति** ।
तेन॑ नो॒ राजा॒ वरु॑णो॒ बृह॒स्-पति॒र्
**आ प्या॑ययन्तु॒** भुव॑नस्य गो॒पाः ।

▼ सर्वाष् टीकाः

⑥अहोरात्रे

▼ 03 ये विरूपे

ये विरू॑पे॒ सम॑नसा स॒व्ँ व्यय॑न्ती ।
स॒मा॒नन्तन्तु॑म्परिताततना ते᳚ ।
वि॒भू प्र॒भू अ॑नु॒भू वि॒श्वतो॑ हुवे ।
ते नो॒ नक्ष॑त्रे ह॒वमाग॑मेतम् ।

▼ 03 ये विरूपे

▼ 04 वयन्देवी ब्रह्मणा

व॒यन्दे॒वी ब्रह्म॑णा स॒व्ँ विदा॒नाः ।
सु॒रत्ना॑सो दे॒ववी॑ति॒न्दधा॑नाः ।
अ॒हो॒रा॒त्रे ह॒विषा॑ व॒र्धय॑न्तः ।
अति॑ पा॒प्मान॒मति॑ मुक्त्या गमेम ।

▼ 04 वयन्देवी ब्रह्मणा

⑥उषाः

▼ 05 प्रत्युवदृश्यायती 24

प्रत्यु॑वदृश्याय॒ती ॥24॥
व्यु॒च्छन्ती॑ दुहि॒ता दि॒वः ।
अ॒पो म॒ही वृ॑णु॒ते चक्षु॑षा ।

▼ 05 प्रत्युवदृश्यायती 24

▼ 06 तमो ज्योतिष्कृणोति

तमो॒ ज्योति॑ष्कृणोति सू॒नरी᳚ ।
उदु॒स्रिया᳚स्सचते॒ सूर्यः॑ ।
सचा॑ उ॒द्यन्नक्ष॑त्रमर्चि॒मत् ।
तवेदु॑षो॒ व्यु॒षि॒ सूर्य॑स्य च ।

▼ 06 तमो ज्योतिष्कृणोति

⑥नक्षत्रम्

▼ 07 सम्भक्तेन गमेमहि

सम्भ॒क्तेन॑ गमेमहि ।
तन्नो॒ नक्ष॑त्रमर्चि॒मत् ।
भा॒नु॒मत्तेज॑ उ॒च्चर॑त् ।
उप॑य॒ज्ञमि॒हाग॑मत् ॥25॥

▼ 07 सम्भक्तेन गमेमहि

▼ 08 प्र नक्षत्राय

प्र नक्ष॑त्राय दे॒वाय॑ ।
इन्द्रा॒येन्दु॒ꣳ हवामहे ।
सनः॑स्सवि॒ता सु॑वथ्स॒निम् ।
पु॒ष्टि॒दाव्ँ वी॒रव॑त्तमम् ।

▼ 08 प्र नक्षत्राय

▼ ०१ उदु त्यं

उदु॒ त्यं **जा॒तवे॑दसं**
दे॒वं **व॑हन्ति के॒तव॑ः**(→रश्मयः) ।
दृ॒शे विश्वा॑य॒ सूर्य॑म् ॥

▼ 001

⑥सूर्यः

▼ ०१ चित्रं देवानामुदगादनीकं

चि॒त्रं दे॒वाना॒म् **उद॑गा॒द्** अनी॑कं
चक्षु॑र् मि॒त्रस्य॒ वरु॑णस्या॒ग्नेः ।
**आ-प्रा॒**(←पूरणे) द्यावा॑-पृथि॒वी अ॒न्तरि॑क्षं
**सूर्य॑** आ॒त्मा जग॑तस् त॒स्थुष॑श् च ॥

▼ 001

⑥अदितिः

▼ 11 अदितिर्न उरुष्यतु

अदि॑तिर् न उरु॒ष्यत्व्
अदि॑ति॒श् शर्म॑ यच्छतु ।
अदि॑तिꣳ पा॒त्व् अꣳह॑सः ॥

▼ 11 अदितिर्न उरुष्यतु

▼ महीम् ऊ षु

म॒हीम् ऊ षु मा॒तरꣳ सु॒व्र॒ताना॑म्
ऋ॒तस्य॒ पत्नी॒म् अव॑से **हुवेम** ।
तु॒वि॒(=प्रवृद्ध)-क्ष॒त्राम् अ॒जर॑न्तीम् उ॒रूचीꣳ(=उरुगमनां) सु॒शर्मा॑ण॒म् अदि॑तिꣳ(=अखण्डनीयां)
सु॒प्रणी॑तिम् ॥

▼ महीम् ऊ षु

⑥विष्णुः

▼ १७ इदं विष्णुर्वि

इ॒दव्ँ॑ विष्णु॒र् (अग्नि-विद्युत्-सूर्यात्मना) **वि च॑क्रमे**
(पृथिव्याम् अन्तरिक्षे दिवि च) त्रे॒धा **नि द॑धे** प॒दम् ।
(तैर् आधारैर् जगत्) **सम् ऊ॑ढम्** अस्य पा॒ꣳसु॒रे (ले इति साम्नि, पांसुमति [पादे]) ॥

▼ 017

▼ ०२ प्र तद्विष्णुः

प्र तद् विष्णु॑ः **स्तवते**(=स्तूयते) वी॒र्ये॑ण
मृ॒गो न भी॒मः कु॑च॒रो गि॑रि॒ष्ठाः ।
यस्यो॒रुषु॑ त्रि॒षु वि॒क्रम॑णेष्व्
**अधिक्षि॒यन्ति॒** भुव॑नानि॒ विश्वा॑ ॥

▼ 002

⑥अग्निः

▼ १६ अग्निर्मूर्धा दिवः

अ॒ग्निर् मू॒र्धा दि॒वः क॒कुत्
पति॑ः पृथि॒व्या अ॒यम् ।
अ॒पां **रेता॑सि जिन्वति**(=प्रीणयति) ॥

▼ 016

▼ भुवो यज्ञस्य

भुवो॑ **य॒ज्ञस्य॒,** (विद्युद्-रूपेण) रज॑सश्(→अन्तरिक्षस्य) च **ने॒ता**
यत्रा॑ **नि॒युद्भि॒स्**(=मरुद्-अश्वैस्) **सच॑से**(संयासि) शि॒वाभि॑ः ।
(सूर्यरूपेण) दि॒वि **मू॒र्धान॑न् दधिषे** सु॒व॒र्षाञ्
**जि॒ह्वाम्** अ॑ग्ने **चकृषे** हव्य॒वाह᳚म् ॥

▼ भुवो यज्ञस्य

⑥अनुमतिः

▼ विश्वास-प्रस्तुतिः

**अनु॑** नो॒ऽद्यानु॑मति॒र् (=ऊनचन्द्रा पौर्णमासी)
य॒ज्ञन् दे॒वेषु॑ **मन्यताम्** ।
अ॒ग्निश् च॑ हव्य॒वाह॑नो॒,
**भव॑तान्** दा॒शुषे॒ मय॑ः ।

▼ विश्वास-प्रस्तुतिः

**अन्व्** इद् अ॑नुमते॒ त्वम् [34]
**मन्या॑सै॒** शञ्च॑ नꭗ **कृधि** ।
क्रत्वे॒ दख्षा॑य नो **हिनु**(=प्रेरय)
प्र ण॒ आयू॑ꣳषि **तारिषः** ।

⑥संयाज्ये

▼ विश्वास-प्रस्तुतिः

ह॒व्य॒वाह॑मभिमाति॒षाह᳚म् ।
र॒ख्षो॒ह॒णम्पृत॑नासु जि॒ष्णुम् ।
ज्योति॑ष्मन्त॒न्दीद्य॑त॒म्पुर॑न्धिम् ।
अ॒ग्निꣳ स्वि॑ष्ट॒कृत॒मा हु॑वेम ।

▼ सर्वाष् टीकाः

▼ विश्वास-प्रस्तुतिः

स्वि॑ष्टमग्ने अ॒भि तत्पृ॑णाहि ।
विश्वा॑ देव॒ पृत॑ना अ॒भिष्य ।
उ॒रुन्न॒ꣷ पन्था᳚म्प्रदि॒शन्विभा॑हि ।
ज्योति॑ष्मद्धेह्य॒जर॑न्न॒ आयु॑ः ।

▼ सर्वाष् टीकाः

▼

④३४ 'अग्नये स्वाहा कृत्तिकाभ्यः स्वाहाः'

'अग्नये स्वाहा कृत्तिकाभ्यः स्वाहाः' इत्याद्युपहोमान्

▼ व्याहृति-त्रयम् (श्रीनिवास-देशिकोक्तम्)

व्याहृतित्रयं

▼ नक्षत्रोपहोमाः

⑥कृत्तिकाः - अग्निः

▼ विश्वास-प्रस्तुतिः

अ॒ग्नये॒ स्वाहा᳚ । कृत्ति॑काभ्य॒स्स्वाहा᳚ ।
अ॒म्बायै॒ स्वाहा॑ ।
दु॒लायै॒ स्वाहा᳚ ।
नि॒त॒त्न्यै स्वाहा॑ ।
अ॒भ्रय॑न्त्यै॒ स्वाहा᳚ ।
मे॒घय॑न्त्यै॒ स्वाहा॑ ।
व॒र्षय॑न्त्यै॒ स्वाहा᳚ । चु॒पु॒णीका॑यै॒ स्वाहा॑

⑥रोहिणी - प्रजापतिः

▼ विश्वास-प्रस्तुतिः

प्र॒जाप॑तये॒ स्वाहा॑ रोहि॒ण्यै स्वाहा᳚ । रोच॑मानायै॒ स्वाहा᳚ प्र॒जाभ्य॒स् स्वाहा᳚ ॥28॥

⑥मृगशीर्षम् - सोमः

▼ विश्वास-प्रस्तुतिः

सोमा॑य॒ स्वाहा॑ मृगशी॒र्षाय॒ स्वाहा᳚ ,
इ॒न्व॒काभ्य॒स् स्वाहौष॑धीभ्य॒स् स्वाहा᳚ ,
रा॒ज्याय॒ स्वाहा॒ ऽभिजि॑त्यै॒ स्वाहा᳚ ॥29॥

⑥आर्द्रा - रुद्रः

▼ विश्वास-प्रस्तुतिः

रु॒द्राय॒ स्वाहा॒ ऽर्द्रायै॒ स्वाहा᳚ , पिन्व॑मानायै॒ स्वाहा॑ प॒शुभ्य॒स्स्वाहा᳚ ॥30॥

⑥पुनर्वसू - अदितिः

▼ विश्वास-प्रस्तुतिः

अदि॑त्यै॒ स्वाहा॒ पुन॑र्वसुभ्या॒ं स्वाहा॑,
भूत्यै॒ स्वाहा॒ प्रजा᳚त्यै॒ स्वाहा᳚ ॥31॥

⑥तिष्यम् / पुष्यम् - बृहस्पतिः

▼ विश्वास-प्रस्तुतिः

बृ॒हस्पत॑ये॒ स्वाहा॑ ति॒ष्या॑य॒ स्वाहा᳚ । ब्र॒ह्म॒व॒र्च॒साय॒ स्वाहा᳚ ॥32॥

⑥आश्रेषाः - सर्पाः

▼ विश्वास-प्रस्तुतिः

स॒र्पेभ्य॒स् स्वाहा᳚ ऽऽश्रे॒षाभ्य॒स् स्वाहा᳚ ।
द॒न्द॒शूके᳚भ्य॒स् स्वाहा᳚ ॥33॥

⑥मघाः - पितरः

▼ विश्वास-प्रस्तुतिः

पि॒तृभ्य॒स् स्वाहा॑ म॒घाभ्य॒स् स्वाहा॑
ऽन॒घाभ्य॒स् स्वाहा॑ग॒दाभ्य॒स् स्वाहा॑
ऽरुन्ध॒तीभ्य॒स् स्वाहा᳚ ॥34॥

⑥पूर्व-फल्गुन्यः - अर्यमा

▼ विश्वास-प्रस्तुतिः

अ॒र्य॒म्णे स्वाहा॒ फल्गु॑नीभ्या॒ꣳ॒ स्वाहा᳚ ,
प॒शुभ्य॒स् स्वाहा᳚ ॥35॥

⑥उत्तर-फल्गुन्यः - भगः

▼ विश्वास-प्रस्तुतिः

भगा॑य॒ स्वाहा॒ फल्गु॑नीभ्या॒ꣳ॒ स्वाहा᳚ । श्रैष्ठ्या॑य॒ स्वाहा᳚ ॥36॥

⑥हस्तः - सविता

▼ विश्वास-प्रस्तुतिः

स॒वि॒त्रे स्वाहा॒ हस्ता॑य॒ स्वाहा॑
द॒द॒ते स्वाहा॑ पृण॒ते स्वाहा᳚
प्र॒यच्छ॑ते॒ स्वाहा᳚ प्रतिगृभ्ण॒ते स्वाहा᳚ ॥37 ॥

⑥चित्रा - त्वष्टा

▼ विश्वास-प्रस्तुतिः

त्वष्ट्रे॒ स्वाहा॑ चि॒त्रायै॒ स्वाहा᳚ ।
चैत्रा॑य॒ स्वाहा᳚ प्र॒जायै॒ स्वाहा᳚ ॥38॥

⑥निष्ट्या, स्वातिः - वायुः

▼ विश्वास-प्रस्तुतिः

वा॒यवे॒ स्वाहा॒ निष्ट्या॑यै॒ स्वाहा᳚ ।
का॒म॒चारा॑य॒ स्वाहा॒
ऽभिजि॑त्यै॒ स्वाहा᳚ ॥39॥

⑥विशाखे - इन्द्राग्नी

▼ विश्वास-प्रस्तुतिः

इ॒न्द्रा॒ग्निभ्या॒ꣳ॒ स्वाहा॒ विशा॑खाभ्या॒ꣳ॒ स्वाहा᳚ ।
श्रैष्ठ्या॑य॒ स्वाहा॒ ऽभिजि॑त्यै॒ स्वाहा᳚ ॥40॥

⑥पूर्णिमा

▼ विश्वास-प्रस्तुतिः

पौ॒र्ण॒मा॒स्यै स्वाहा॒ कामा॑य॒ स्वाहा ऽऽग॑त्यै॒ स्वाहा᳚ ॥41॥

⑥अनूराधाः - मित्रः

▼ विश्वास-प्रस्तुतिः

मि॒त्राय॒ स्वाहा॑ ऽनूरा॒धेभ्य॒स् स्वाहा᳚ ।
मि॒त्र॒धेया॑य॒ स्वाहा॒ ऽभिजि॑त्यै॒ स्वाहा᳚ ॥42॥

⑥ज्येष्ठा - इन्द्रः

▼ विश्वास-प्रस्तुतिः

इन्द्रा॑य॒ स्वाहा᳚ ज्ये॒ष्ठायै॒ स्वाहा᳚ ।
ज्यैष्ठ्या॑य॒ स्वाहा॒ ऽभिजि॑त्यै॒ स्वाहा᳚ ॥43॥

⑥मूलम् - निर्ऋतिः

▼ विश्वास-प्रस्तुतिः

प्र॒जाप॑तये॒ स्वाहा॒ मूला॑य॒ स्वाहा᳚ । प्र॒जायै॒ स्वाहा᳚ ॥44॥

⑥अषाढाः पूर्वाः - आपः

▼ विश्वास-प्रस्तुतिः

अ॒द्भ्यस् स्वाहा॑ ऽषा॒ढाभ्य॒स् स्वाहा᳚ ।
स॒मु॒द्राय॒ स्वाहा॒ कामा॑य॒ स्वाहा᳚ ।
अ॒भिजि॑त्यै॒ स्वाहा᳚ ॥45॥

⑥अषाढाः उत्तराः - विश्वे देवाः

▼ विश्वास-प्रस्तुतिः

विश्वे᳚भ्यो दे॒वेभ्य॒स् स्वाहा॑ ऽषा॒ढाभ्य॒स् स्वाहा᳚ । अ॒न॒प॒ज॒य्याय॒ स्वाहा॒ जित्यै॒ स्वाहा᳚ ॥46॥

⑥अभिजित्

▼ विश्वास-प्रस्तुतिः

ब्रह्म॑णे॒ स्वाहा॑ ऽभि॒जि॒ते॒ स्वाहा᳚ । ब्र॒ह्म॒लो॒काय॒ स्वाहा॒ ऽभिजि॑त्यै॒ स्वाहा᳚ ॥47॥

⑥श्रोणा / श्रवणम् - विष्णुः

▼ विश्वास-प्रस्तुतिः

विष्ण॑वे॒ स्वाहा᳚ श्रो॒णायै॒ स्वाहा᳚ ।
श्लोका॑य॒ स्वाहा᳚ श्रु॒ताय॒ स्वाहा᳚ ॥48॥

⑥धनिष्ठाः/ श्रविष्ठाः - वसवः

▼ विश्वास-प्रस्तुतिः

वसु॑भ्य॒स् स्वाहा॒ श्रवि॑ष्ठाभ्य॒स् स्वाहा᳚ ।
अ॒ग्रा॑य॒ स्वाहा॒ परी᳚त्यै॒ स्वाहा᳚ ॥49॥

⑥शतभिषग् - वरुणः

▼ विश्वास-प्रस्तुतिः

वरु॑णाय॒ स्वाहा॑ श॒तभि॑षजे॒ स्वाहा᳚ । भे॒ष॒जेभ्य॒स् स्वाहा᳚ ॥50॥

⑥प्रोष्ठपदाः/ भाद्रपदाः पूर्वाः - अज एकपात्

▼ विश्वास-प्रस्तुतिः

अ॒जायैक॑पदे॒ स्वाहा᳚ प्रोष्ठप॒देभ्य॒स् स्वाहा᳚ ।
तेज॑से॒ स्वाहा᳚ ब्रह्मवर्च॒साय॒ स्वाहा᳚ ॥51॥

⑥प्रोष्ठपदाः/ भाद्रपदाः उत्तराः - अहिर् बिध्नियः

▼ विश्वास-प्रस्तुतिः

अहि॑ये बु॒ध्निया॑य॒ स्वाहा᳚
प्रोष्ठप॒देभ्य॒स् स्वाहा᳚ । प्र॒ति॒ष्ठायै॒ स्वाहा᳚ ॥52॥

⑥रेवती - पूषा

▼ विश्वास-प्रस्तुतिः

पू॒ष्णे स्वाहा॑ रे॒वत्यै॒ स्वाहा᳚ । प॒शुभ्य॒स् स्वाहा᳚ ॥53॥

▼ विश्वास-प्रस्तुतिः

अ॒श्विभ्या॒ꣳ॒ स्वाहा᳚ ऽश्व॒युग्भ्या॒ꣳ॒ स्वाहा᳚ ।
श्रोत्रा॑य॒ स्वाहा॒ श्रुत्यै॒ स्वाहा᳚ ॥54॥

⑥भरणी - यमः

▼ विश्वास-प्रस्तुतिः

य॒माय॒ स्वाहा॑ ऽप॒भर॑णीभ्य॒स् स्वाहा᳚ ।
रा॒ज्याय॒ स्वाहा॒ ऽभिजि॑त्यै॒ स्वाहा᳚ ॥55॥

⑥अमावास्या

▼ विश्वास-प्रस्तुतिः

अ॒मा॒वा॒स्या॑यै॒ स्वाहा॒ कामा॑य॒ स्वाहा ऽऽग॑त्यै॒ स्वाहा᳚ ॥56॥

▼ चन्द्रमसाद्य-उपहोमाः

▼ विश्वास-प्रस्तुतिः

च॒न्द्रम॑से॒ स्वाहा᳚ प्रती॒दृश्या॑यै॒ स्वाहा᳚ ।
अ॒हो॒रा॒त्रेभ्य॒स् स्वाहा᳚ ऽर्धमा॒सेभ्य॒स् स्वाहा᳚ ।
मासे᳚भ्य॒स् स्वाह॒र्तुभ्य॒स् स्वाहा᳚ । स॒व्ँ॒व॒थ्स॒राय॒ स्वाहा᳚

▼ विश्वास-प्रस्तुतिः

अह्ने॒ स्वाहा॒ रात्रि॑यै॒ स्वाहा᳚ ।
अति॑मुक्त्यै॒ स्वाहा᳚

▼ विश्वास-प्रस्तुतिः

उ॒ष॒से॒ स्वाहा॒ व्यु॑ष्ट्यै॒ स्वाहा᳚ । व्यू॒षुष्यै॒ स्वाहा᳚ व्यु॒च्छन्त्यै॒ स्वाहा᳚ । व्यु॑ष्टायै॒ स्वाहा᳚

▼ विश्वास-प्रस्तुतिः

नख्ष॑त्राय॒ स्वाहो॑देष्य॒ते स्वाहा᳚ । उ॒द्य॒ते स्वाहोदि॑ताय॒ स्वाहा᳚ ।
हर॑से॒ स्वाहा॒ भर॑से॒ स्वाहा᳚ । भ्राज॑से॒ स्वाहा॒ तेज॑से॒ स्वाहा᳚ ।
तप॑से॒ स्वाहा᳚ ब्रह्मवर्च॒साय॒ स्वाहा᳚

▼ विश्वास-प्रस्तुतिः

सूर्या॑य॒ स्वाहा॒ नख्ष॑त्रेभ्य॒स् स्वाहा᳚ । प्र॒ति॒ष्ठायै॒ स्वाहा᳚

▼ विश्वास-प्रस्तुतिः

अदि॑त्यै॒ स्वाहा᳚ प्र॒ति॒ष्ठायै॒ स्वाहा᳚

▼ विश्वास-प्रस्तुतिः

विष्ण॑वे॒ स्वाहा॑ य॒ज्ञाय॒ स्वाहा᳚ । प्र॒ति॒ष्ठायै॒ स्वाहा᳚

▼

## ④३५ 'दधिक्राव्णः'

‘दधिक्राव्ण’ इत्यृचम्,

▼ ०६ दधिक्राव्णो अकारिषं

(pegasus-प्रोष्ठपदासु) द॒धि॒-क्राव्णो॑ **अकारिषं**
जि॒ष्णोर् अश्व॑स्य वा॒जिनः॑ ।
**सु॒र॒भि** नो॒ मुखा॑ **क॒र॒त्**
प्र ण॒ **आयूँ॑षि तारिषत्** ।

▼

## ④३६ 'आपो हिष्ठा मयोभुवः

‘आपो हिष्ठा मयोभुव’ इति त्रिसृः,

▼ ०१ आपो हि

आपो॒ हि ष्ठा म॑यो॒भुव॑स्
ता न॑ ऊ॒र्जे(जाः) द॑धातन ।
म॒हे रणा॑य॒(=रमणीयाय) चक्ष॑से(=दर्शनाय) ॥

▼ ०२ यो वः

यो व॑ः शि॒वत॑मो॒ रस॑स्
तस्य॑ भाजयते॒ह न॑ः ।
उ॒श॒तीर्(=कामयमाना) इ॑व मा॒तर॑ः ॥

▼ ०३ तस्मा अरं

(रसाय) तस्मा॒ अर॑ं(=शीघ्रम्) गमाम वो
यस्य॒ (प्रभावेण) क्षया॑य॒(=निवासाय) जिन्व॑थ(=प्रीणयथ) ।
आपो॑ (प्रजा) ज॒नय॑था च नः ॥

▼

## ④३७ वारुणम्

‘उदुत्तमं वरुण’, ‘अस्तभ्नाद् द्यां’, ‘यत्किञ्चेदं’, ‘कितवासो’, ‘अवते हेडः,’ ‘तत्त्वायामि’
इति वरुण-सूक्तं

▼ ०४ वारुणम्

▼ १५ उदुत्तमं वरुण

उदु॑त्त॒मं व॑रुण॒ पाश॑म् अ॒स्मद्
अवा॑ध॒मं वि म॑ध्य॒मं **श्र॑थाय** ।
अथा॑ व॒यम् आ॑दित्य व्र॒ते तवा
+ऽना॑गसो॒ अदि॑तये **स्याम** ॥३॥

▼ 015

▼ अस्तभ्नाद् द्याम्

**अस्त॑भ्ना॒द्** द्याम् ऋ॑ष॒भो(=वर्षिता) अ॒न्तरि॑ख्ष॒म्
**अमि॑मीत** व॒रि॒माण॑म्(=उरुत्वम्) पृ॒थि॒व्याः (सूर्यग्रहणेन?)।
**आसी॑द॒द्** विश्वा॒ भुव॑नानि स॒म्राड्(=सङ्गतदीप्तिः [सोमः])
विश्वेत् तानि॒ वरु॑णस्य(=वारकस्य) व्र॒तानि॑॥

▼ अस्तभ्नाद् द्याम्

▼ ०५ यत्किं चेदं

यत् किं चे॒दं व॑रुण॒ दैव्ये॒(←देव+यञ्) जने॑(देवेषु),
ऽभिद्रो॒हं म॑नु॒ष्या॑श् चरा॑मसि।
अचि॑त्ती॒ यत् तव॒ धर्मा॑ युयोपि॒म(विनाशयामः),
मा न॒स् तस्मा॒द् एन॑सो देव रीरिषः ॥

▼ 005

▼ ०८ कितवासो यद्रिरिपुर्न

(ऋत्विजः) कि॒त॒वासो॒ यद् रि॑रि॒पुर्(=लिलिपुः) न दी॒वि(देवकर्मणि),
यद् वा॑ ऽघा स॒त्यम् उ॒त यन् न वि॒द्म ।
सर्वा॒ ता विष्य॑(=विनाशय) शिथि॒रेव॑(=शिथिला +इव)
दे॒वाथा॑ ते स्याम वरुण प्रि॒यास॑ः ॥

▼ 008

▼ १४ अव ते

अव॑ ते॒ **हेळो॑**(←हेड् अवज्ञायां) वरुण॒ नमो॑भि॒र्
**अव॑** य॒ज्ञेभि॑र् **ईमहे**(→नयामः) ह॒विर्भि॑ः ।
**क्षय॑न्न्**(=निवसन्) अ॒स्मभ्य॑म् असुर प्रचेता॒
राज॒न्न् **एनां॑सि शिश्रथः**(=शिथिलीकुरु) कृ॒तानि॑ ॥

▼ 014

▼ ११ तत्त्वा यामि

तत् त्वा॑ **यामि॒** ब्रह्म॑णा॒ **वन्द॑मान॒स्**
तद् **आ शास्ते॒** यज॑मानो ह॒विर्भि॑ः ।
अहे॑ळमानो (=अक्रुध्यन्) वरुणे॒ह **बो॒ध्य्** उरु॑शंस॒
मा न॒ आयु॑ः **प्र मोषीः** ॥

▼ 011

▼

## ④३८ ‘हिरण्यवर्णाः’

▼ ०१ कुम्भेष्टकाः - ०१ हिरण्यवर्णाः शुचयः
▼ विश्वास-प्रस्तुतिः

हिरण्यवर्णाश् शुचयᳶ पावका,
यासु जातᳵ कश्यपो, यास्व् इन्द्रः ।
अग्निं या गर्भन् **दधिरे**, विरूपास् -
ता न आपश् शᳪ स्योना **भवन्तु** ।

▼ सर्वाप् टीकाः
▼ विश्वास-प्रस्तुतिः

यासाᳪ राजा वरुणो **याति** मध्ये,
सत्यानृते **अवपश्यञ्** जनानाम् ।
मधुश्-**चुतश्** शुचयो याᳶ पावकास् -
ता न आपश् शᳪ स्योना **भवन्तु** ।

▼ सर्वाप् टीकाः
▼ विश्वास-प्रस्तुतिः

यासान् देवा दिवि **कृण्वन्ति** भक्ष्यं -
या अन्तरिक्षे बहुधा **भवन्ति** ।
याᳶ पृथिवीम् **पयसोन्दन्ति** शुक्रास् -
ता न आपश् शᳪ स्योना **भवन्तु** ।

▼ सर्वाप् टीकाः
▼ ०१ कुम्भेष्टकाः - ०५-१३ यद् अदः
▼ विश्वास-प्रस्तुतिः

यद् अदस् सम्प्रयतीर्
अहाव्(→मेघे, serpens) **अनदता** हते (ज्येष्ठ-स्थ+इन्द्रेण)।
तस्माद् आ नद्यो (→द्युनद्य अपि) नाम **स्थ**,
ता वो नामानि सिन्धवः(=स्यन्दनशीलाः) ।(4)

▼ सर्वाप् टीकाः
▼ विश्वास-प्रस्तुतिः

यत् **प्रेषिता** वरुणेन,
ताश् शीभᳪ(=शिवं) **समवल्गत**(=अनृत्यत) । [2]
तद् (द्युगङ्गेति, मेघरूपेण वा) **आप्नोद्** (ज्येष्ठास्थ) इन्द्रो वो यतीस् -
तस्माद् आपो अनु **स्थन** ।

▼ सर्वाप् टीकाः
▼ विश्वास-प्रस्तुतिः

अपकामᳪ **स्यन्दमाना**
**अवीवरत**(←वृ) वो हिकम्(=हि) ।
इन्द्रो वश् शक्तिभिर् देवीस् -
तस्माद् वार्(=वारि) णाम वो **हितम्** ।

▼ सर्वाप् टीकाः
▼ विश्वास-प्रस्तुतिः

एको देवो अप्य् **अतिष्ठत्** -
**स्यन्दमाना** यथा-वशम् ।
**उदानिषुर्**(←उदान=उच्छ्वास) महीर् इति,
तस्माद् उदकम् **उच्यते** ।

▼ सर्वाप् टीकाः
▼ विश्वास-प्रस्तुतिः

आपो भद्रा, घृतम् इद् आप आसुर् -
अग्नीषोमौ **बिभ्रत्य्**, आप इत् ताः ।
तीव्रो रसो मधु-पृचाम् अरङ्-गम (→रसः)
**आ** मा प्राणेन सह वर्चसा **गन्** ।

▼ सर्वाप् टीकाः
▼ विश्वास-प्रस्तुतिः

आद्(=अतः) इत् **पश्याम्य्** उत वा **शृणोम्य्**
आ मा घोषो **गच्छति** वाङ् न आसाम् ।
**मन्ये** भेजानो(←भज) अमृतस्य तर्हि
हिरण्य-वर्णा **अतृपं** यदा वः ।

▼ सर्वाप् टीकाः
▼ ०१ आपो हि

आपो हि ष्ठा मयोभुवस्
ता न ऊर्जे(जाः) दधातन ।
महे रणाय(=रमणीयाय) चक्षसे(=दर्शनाय) ॥

▼ 001
▼ ०२ यो वः

यो वः शिवतमो रसस्
तस्य भाजयतेह नः ।
उशतीर्(=कामयमाना) इव मातरः ॥

▼ 002
▼ ०३ तस्मा अरं

(रसाय) तस्मा अरं(=शीघ्रम्) गमाम वो
यस्य (प्रभावेण) क्षयाय(=निवासाय) जिन्वथ(=प्रीणयथ) ।
आपो (प्रजा) जनयथा च नः ॥

▼ 003
▼ विश्वास-प्रस्तुतिः

शिवेन मा चक्षुषा **पश्यतापश्** -
शिवया तनुवोप **स्पृशत** त्वचम् मे ।
सर्वाᳪ अग्नीᳪर् अप्सु-षदो **हुवे** वो,
मयि वर्चो बलम् ओजो **नि धत्त** ।

▼ सर्वाप् टीकाः
▼ ०१ कुम्भेष्टकाः - ०५-१३ यद् अदः
▼ विश्वास-प्रस्तुतिः

यद् अदस् सम्प्रयतीर्
अहाव्(→मेघे, serpens) **अनदता** हते (ज्येष्ठ-स्थ+इन्द्रेण)।
तस्माद् आ नद्यो (→द्युनद्य अपि) नाम **स्थ**,
ता वो नामानि सिन्धवः(=स्यन्दनशीलाः) ।(4)

▼ सर्वाप् टीकाः
▼ विश्वास-प्रस्तुतिः

यत् **प्रेषिता** वरुणेन,
ताश् शीभᳪ(=शिवं) **समवल्गत**(=अनृत्यत) । [2]
तद् (द्युगङ्गेति, मेघरूपेण वा) **आप्नोद्** (ज्येष्ठास्थ) इन्द्रो वो यतीस् -
तस्माद् आपो अनु **स्थन** ।

▼ सर्वाप् टीकाः
▼ विश्वास-प्रस्तुतिः

अपकामᳪ **स्यन्दमाना**
**अवीवरत**(←वृ) वो हिकम्(=हि) ।
इन्द्रो वश् शक्तिभिर् देवीस् -
तस्माद् वार्(=वारि) णाम वो **हितम्** ।

▼ सर्वाप् टीकाः
▼ विश्वास-प्रस्तुतिः

एको देवो अप्य् **अतिष्ठत्** -
**स्यन्दमाना** यथा-वशम् ।
**उदानिषुर्**(←उदान=उच्छ्वास) महीर् इति,
तस्माद् उदकम् **उच्यते** ।

▼ सर्वाप् टीकाः
▼ विश्वास-प्रस्तुतिः

आपो भद्रा, घृतम् इद् आप आसुर् -
अग्नीषोमौ **बिभ्रत्य्**, आप इत् ताः ।
तीव्रो रसो मधु-पृचाम् अरङ्-गम (→रसः)
**आ** मा प्राणेन सह वर्चसा **गन्** ।

▼ सर्वाप् टीकाः
▼ विश्वास-प्रस्तुतिः

आद्(=अतः) इत् **पश्याम्य्** उत वा **शृणोम्य्**
आ मा घोषो **गच्छति** वाङ् न आसाम् ।
**मन्ये** भेजानो(←भज) अमृतस्य तर्हि
हिरण्य-वर्णा **अतृपं** यदा वः ।

▼ सर्वाप् टीकाः
▼ ०१ आपो हि

आपो हि ष्ठा मयोभुवस्
ता न ऊर्जे(जाः) दधातन ।
महे रणाय(=रमणीयाय) चक्षसे(=दर्शनाय) ॥

▼ 001
▼ ०२ यो वः

यो वः शिवतमो रसस्
तस्य भाजयतेह नः ।
उशतीर्(=कामयमाना) इव मातरः ॥

▼ 002
▼ ०३ तस्मा अरं

(रसाय) तस्मा अरं(=शीघ्रम्) गमाम वो
यस्य (प्रभावेण) क्षयाय(=निवासाय) जिन्वथ(=प्रीणयथ) ।
आपो (प्रजा) जनयथा च नः ॥

▼ 003

▼

④३९ 'पवमानः'

▼ ०८, पावमानीमन्त्राः
▼ 01 पवमानस् सुवर्जनः

पव॑मान॒स् सु॒व॒र्-जनः॑ ।
प॒वित्रे॑ण॒ (नाना-विषयेषु) विच॑र्षणिः ।
य॑ꣳ पोता॒ स पु॑नातु मा ।

▼ 02 पुनन्तु मा

**पु॒नन्तु॑** मा **देवज॒नाः** ।
पु॒नन्तु॒ **मन॑वो** धि॒या ।
पु॒नन्तु॒ **विश्व॑ आ॒यवः॑**(=मनुष्याः) ।

▼ 03 जातवेदꣳ पवित्रवत्

जात॑वेदꣳ प॒वित्र॑वत् ।
प॒वित्रे॑ण **पुनाहि**(=पुनीहि) मा ।
शु॒क्रेण॑ दे॒व **दीद्य॑त्** ।
**अग्ने॒** क्रत्वा॒(=प्रज्ञया) क्रतू॒ꣳ॒र् अनु॑ ॥46॥

▼ 04 यत् ते

यत् ते॑ **प॒वित्र॑म् अ॒र्चिषि॑** ।
अग्ने॒ वित॑तम् अन्त॒रा ।
ब्रह्म॒ तेन॑ **पुनीमहे** ।

▼ 05 उभाभ्यान् देव

उ॒भाभ्या॑᳚न् देव **सवितः** ।
प॒वित्रे॑ण स॒वेन॑ च ।
इ॒दम् ब्रह्म॑ **पुनीमहे** ।(5)

▼ 06 वैश्वदेवी पुनती

वै॒श्व॒दे॒वी **पु॑न॒ती** दे॒व्य् **आगा᳚त्**(=आगच्छतु) ।
यस्यै॑ ब॒ह्वीस् त॒नुवो॑ वी॒त-पृ॑ष्ठाः(=कान्त-स्तुतयः) ।
तया॒ **मद॑न्तस्** स॒ध-माद्ये॑षु (=सह माद्यन्ति येषु सवनेषु) ।
व॒यꣳ **स्याम॒** पत॑यो र॒यी॒णाम् ॥47॥

▼ 07 वैश्वानरो रश्मिभिर्

**वै॒श्वा॒न॒रो** र॒श्मिभि॑र् मा **पुनातु** ।
**वात॑ꣳ** प्रा॒णेने॑षि॒रो(←इष गतौ) म॑यो॒भूः ।
**द्यावा॑पृथि॒वी** पय॑सा॒ पयो॑भिः (इति क्रमशः) ।
ऋ॒ताव॑री(=ऋतवत्यौ) य॒ज्ञिये॑ मा **पुनीताम्** ।

▼ 08 बृहद्भिस् सवितस्

बृ॒हद्भि॑स् सवित॒स् तृभिः॑(=त्रिभिः [लोकगणनया]/ तृप्यतेः करणे क्विप्) ।
वर्षि॑ष्ठैर्(=प्रवृद्ध-धर्मैः) दे॒व मन्म॑भिः(=मननीयैः) ।
अग्ने॒ दक्षै᳚ꣳ **पुनाहि** मा ।

▼ 09 येन देवा

येन॑ दे॒वा **अपु॑नत** ।
येनापो॑ दि॒व्यङ् **कशः॑**(←कशेर् गतिकर्मणो ऽसुन्) ।
तेन॑ दि॒व्येन॒ ब्रह्म॑णा ॥48॥
इ॒दम् ब्रह्म॑ **पुनीमहे** ।

▼ 10 यꣳ पावमानीर्

यꣳ पा॑वमा॒नीर् **अ॒ध्येति॑** ।
**ऋषि॑भि॒स् सम्भृ॑त॒ꣳ॒** रस᳚म् ।
सर्व॒ꣳ॒ स पू॒तम् **अ॑श्नाति** ।
**स्व॒दि॒तम्**(=स्वादुकृतं) मा॑त॒रिश्व॑ना(=वायुना) ।

▼ 11 पावमानीर् यो

पा॒व॒मा॒नीर् यो **अ॒ध्येति॑** ।
ऋषि॑भि॒स् **सम्भृ॑त॒ꣳ॒** रस᳚म् ।
तस्मै॒ सर॑स्वती **दुहे** ।
क्षी॒रꣳ॒ स॒र्पिर् मधू॑द॒कम् ।

▼ 12 पावमानीस् स्वस्त्ययनीः

पा॒व॒मा॒नीस् **स्व॒स्त्य्-अय॑नीः** ॥49॥
सु॒-दुघा॒ हि पय॑स्वतीः ।
ऋषि॑भि॒स् **सम्भृ॑तो॒** रसः॑ ।
ब्रा॒ह्म॒णेष्व् अ॒मृत॑ꣳ॒ **हि॒तम्** ।

▼ 13 पावमानीर् दिशन्तु

पा॒व॒मा॒नीर् **दि॑शन्तु** नः ।
इ॒मल्ँ लो॒कम् अथो॑ अ॒मुम् ।
कामा॒न्थ् **सम॑र्धयन्तु** नः ।
दे॒वीर् दे॒वैस् **स॒माभृ॑ताः** ।

▼ 14 पावमानीस् स्वस्त्ययनीः

पा॒व॒मा॒नीस् **स्व॒स्त्य्-अय॑नीः** ।
सु॒-दुघा॒ हि घृ॑त॒श्-**चुतः॑**(=क्षारयित्र्यः) ।
ऋषि॑भि॒स् **सम्भृ॑तो॒** रसः॑ ॥50॥
ब्रा॒ह्म॒णेष्व् अ॒मृत॑ꣳ॒ **हि॒तम्** ।

▼ 15 येन देवाꣳ

येन॑ दे॒वाꣳ प॒वित्रे॑ण ।
आ॒त्मान॑म् **पु॒न॒ते** सदा᳚ ।
तेन॑ स॒हस्र॑-धारेण ।
पा॒व॒मा॒न्यꣳ **पु॑नन्तु** मा ।

▼ 16 प्राजापत्यम् पवित्रम्

प्रा॒जा॒प॒त्यम् प॒वित्र᳚म् ।
श॒तोद्या॑मꣳ हि॒र॒ण्मय᳚म् ।
तेन॑ ब्रह्म॒-विदो॑ व॒यम् ।
**पू॒तम्** (यथा तथा स्वीयम्) ब्रह्म॑ **पुनीमहे** ।

▼ 17 इन्द्रस् सुनीती

**इन्द्र॑स्** सु॒नी॒ती(त्या) स॒ह मा॑ पुनातु ।
**सोम॑स्** स्व॒स्त्या **वरु॑णस्** स॒मीच्या᳚(=सम्यगञ्चनया) ।
**य॒मो** राजा᳚ प्रमृ॒णाभि॑ꣳ(=प्रमारिकाभिः) पुनातु मा ।
**जा॒तवे॑दा** मा+ऊ॒र्जय॑न्त्या पुनातु ॥51॥

▼

## ④४० 'तच्छं॑योः' इत्यनुवाकान्,

▼ ११, शंयुवाकः

▼ विश्वास-प्रस्तुतिः

(फलं) तच् छं॒योर् (बार्हस्पत्याद्) **आवृ॑णीमहे** -
(देवान् प्रति) गा॒तुं (=गमनं [हविषाम्]) - य॒ज्ञाय॑,
गा॒तुं(=गमनम्) य॒ज्ञप॑तये ।

▼ विश्वास-प्रस्तुतिः

दैवी᳚ स्व॒स्तिर॑स्तु नः ।
स्व॒स्तिर् मानु॑षेभ्यः ।

▼ विश्वास-प्रस्तुतिः

ऊ॒र्ध्वञ् जि॑गातु(=गच्छतु) भे॒षजम् ।
शन् नो॑ अस्तु द्वि॒पदे᳚ ।
शञ् चतु॑ष्पदे ॥25॥

ॐ शान्ति॒श्शान्ति॒श्शान्तिः॑ ।

▼

## ④४१ 'यो ब्रह्मा ब्रह्मणः'

'यो ब्रह्मा ब्रह्मण' इति घृतसूक्तं च जपित्वा,

▼ आयुष्य/घृत-सूक्तम्

▼ विश्वास-प्रस्तुतिः

(मृगशिरसि यथा दृश्यते)
यो ब्रह्मा **ब्रह्मण उज्जहार**
प्राणैः **शिरः** कृत्तिवासाः पिनाकी (आर्द्रा-स्थः)।
ईशानो देवः स न आयुर् **दधातु**
तस्मै **जुहोमि** हविषा घृतेन ॥ १ ॥

▼ विश्वास-प्रस्तुतिः

(आर्द्रा-रूपेण) **विभ्राजमानः** सरिरस्य(=सलिलस्य [आकाशगङ्गायाः]) मध्याद्
रोचमानो घर्मरुचिर् य **आगात्** ।
स मृत्यु-पाशान् **अपनुद्य** घोरान्
इहायुषेणो घृतम् **अत्तु** देवः ॥ २ ॥

▼ विश्वास-प्रस्तुतिः

ब्रह्म-ज्योतिर् ब्रह्म-पत्नीषु गर्भं
यम् **आदधात्** पुरु-रूपं **जयन्तम्** ।
सुवर्ण-रम्भ-ग्रहम् अर्कम् **अर्च्यं**
तम् आयुषे **वर्धयामो** घृतेन ॥ ३ ॥

▼ विश्वास-प्रस्तुतिः

श्रियं लक्ष्मीम् औबलाम् अम्बिकां गां
षष्ठीं च याम् इन्द्र-सेनेत्य् **उदाहुः** ।
तां विद्यां ब्रह्म-योनिँ सरूपाम्
इहायुषे **तर्पयामो** घृतेन ॥ ४ ॥

▼ विश्वास-प्रस्तुतिः

दाक्षायण्यः सर्व-योन्यः स-योन्यः
सहस्रशो विश्वरूपा विरूपाः ।
स-सूनवः स-पतयः स-यूथ्या

आयुषणो घृतम् इदं **जुषन्ताम्** ॥ ५ ॥

▾ विश्वास-प्रस्तुतिः

दिव्या गणा बहु-रूपाः पुराणा
आयुश्-छिदो नः **प्रमथ्नन्तु** वीरान् ।
तेभ्यो **जुहोमि** बहुधा घृतेन
**मा** नः प्रजाँ **रीरिषो** मोत वीरान् ॥ ६ ॥

▾ विश्वास-प्रस्तुतिः

एकः पुरस्तात् य इदं **बभूव**
यतो **बभूव** भुवनस्य गोपाः ।
यम् अप्य् **एति** भुवनँ साम्पराये
स नो हविर् घृतम् इहायुषे **ऽत्तु** देवः ॥ ७ ॥

▾ विश्वास-प्रस्तुतिः

वसून् रुद्रान् आदित्यान् मरुतोऽथ साध्यान्
ऋभून् यक्षान् गन्धर्वाँश् च पितॄँश् च विश्वान् ।
भृगून् सर्पाँश् चाङ्गिरसोऽथ सर्वान्
घृतँ **हुत्वा** स्वायुष्या **महयाम** शश्वत् ॥ ८ ॥

▾ सर्वाप् टीका:

▾ सर्वाप् टीका:

## ④४२ आभिर् गीर्भिः

▾ विश्वास-टिप्पनी

अयम् प्रायश्चित्तपाठः श्रीनिवस-देशिकेन सूचितः।

▾ 32 आभिर् गीर्भिर्

आभिर् गीर्भिर् यद् अतो न **ऊनम्**
**आप्यायय** हरिवो (=अश्ववान्, स्वर्णवान् वा [इन्द्रः]) **वर्द्धमानः**।
यदा स्तोतृभ्यो महि गोत्रा (=मेघान्) **रुजासि** (=भिनक्षि)
**भूयिष्ठभाजो** अध(=अत) ते **स्याम**॥

## ④४३ 'नमो ब्रह्मण'

इति परिधानीयां त्रिः जपित्वा

(पच्छो ऽर्धर्चशः पूर्णम् इति
+उत्तरोत्तरस्वरैः जप्यमानं श्रूयते)

▾ नमो ब्रह्मणे

(ॐ)
नमो ब्रह्मणे(=वेदाय), नमो अस्त्वग्नये
नमः पृथिव्यै, नम ओषधीभ्यः ।
नमो वाचे, नमो वाचस्पतये,
नमो विष्णवे बृहते करोमि ॥

(शतुरनुमो नद्यजादी ⇒ बृहन्महतोरुपसंख्यानम्। (वा०) इति बृहच्छब्दाद् अनुमोऽजादिर् विभक्तिर् असर्वनामस्थानम् उदात्ता भवति।)

ॐ शान्तिः शान्तिः शान्तिः ॥

## ②०४ प्रोक्षणम्

प्रणवेन कुम्भम् उत्थाप्य
'देवस्य' इत्यादि,

▾ देवस्य त्वा - तेजोवीर्य-श्रीभ्यः

▾ विश्वास-प्रस्तुतिः

देवस्य त्वा सवितुः प्रसवे ।
अश्विनोर्बाहुभ्याम् ।
पूष्णो हस्ताभ्याम् ।
अश्विनोर्भैषज्येन ।
तेजसे ब्रह्मवर्चसायाभिषिञ्चामि ।

▾ विश्वास-प्रस्तुतिः

देवस्य त्वा सवितुः प्रसवे ।
अश्विनोर्बाहुभ्याम् ।
पूष्णो हस्ताभ्याम् ।
सरस्वत्यै भैषज्येन ॥21॥
वीर्यायान्नाद्यायाभिषिञ्चामि ।

▾ विश्वास-प्रस्तुतिः

देवस्य त्वा सवितुः प्रसवे ।
अश्विनोर्बाहुभ्याम् ।
पूष्णो हस्ताभ्याम् ।
इन्द्रस्येन्द्रियेण ।
श्रियै यशसे बलायाभिषिञ्चामि ।

▾ देवस्य त्वा - साम्राज्येनाभिषिञ्चामि

▾ देवस्य त्वा सवितुः

▾ विश्वास-प्रस्तुतिः

देवस्य त्वा सवितुः प्रसवे(=अनुज्ञायां), ऽश्विनोर् बाहुभ्याम्, पूष्णो हस्ताभ्याम्...

▾ विश्वास-प्रस्तुतिः

सरस्वत्यै वाचो
यन्तुर् यन्त्रेण अग्नेस् त्वा साम्राज्येनाभिषिञ्चामि ।

▾ विश्वास-प्रस्तुतिः

इन्द्रस्य साम्राज्येनाभिषिञ्चामि ॥
बृहस्पतेस् त्वा साम्राज्येनाभिषिञ्चामि ॥

व्याहृतिभिश्च यजमानं प्रोक्षयेत् ।

## ②०५ दक्षिणादानादि

अथ यजमानः
पुरस्ताद् उपविशते हिरण्यं,
दक्षिणत उपविशते रजतं,
पश्चाद् उपविशते कांस्यम्
उत्तरत उपविशते वासश् च
दक्षिणां **दत्वा**
कुम्भजलेन **स्नायात्** ॥

॥ इति प्रयोगचन्द्रिकायां द्वितीयः खण्डः ॥